# ।। अथ प्रथमोऽध्यायः ।।

## मंगलाचरणम्

वेदाः स्तोतुं प्रवृत्ता यदनवधिमहानन्दमालक्ष्य दूरात्,
प्रत्यावर्तन्त सर्गस्थितिलयमखिलस्याऽस्य येनामनन्ति ।
स्थाने दिव्येऽक्षरे यो निवसति सततं नित्यमुक्तानुषक्तः,
सोऽयं कृष्णः कृपालुस्स्वयमवति निजान्स्वामिनारायणो नः ॥

यन्मूलं शास्त्रमाहुर्भवति तदितरन्नैव यस्मिन् प्रमाणम्,
सिद्धेऽप्यन्वेति यस्मिन्ननवधिकमहानन्दरूपे फलत्वम् ।
कर्मज्ञानादयो यत्प्रसदनविधयो येन सर्वार्थसिद्धि,
र्यत्सेवा मुक्तिसीमा स दिशतु कुशलं स्वामिनारायणो नः ॥

व्याचख्यौ व्याससूत्रं व्यतनुत भगवत्स्वामिनारायणस्य,
स्तोत्रं छन्दोमयं यो ह्यकुरुत भगवत्वाक्सुधासंग्रहं च ।
आत्मज्ञानादिपूर्णं गुरुरिति भगवान् मन्यते यं मुनीन्द्रं,
तं मुक्तानंदमीडे शमदमनिलयं साधुगोष्ठीगरिष्ठम् ॥

श्रीयोगिराजं तपसातिपूतं, श्रीयोगिराजं महसातिदीप्तम् ।
श्रीयोगिराजं मनसातिशुद्धं, श्रीयोगिराजं प्रणमामि भूयः ॥

संसारसमर्चितवयुनविमर्षितदर्शितदर्शननिखिलप्रदर्शनपराणां विश्वविदुषां,विश्वसृट्समर्पितवैदुष्याणाम्,अपरिणतमतिप्रतिभानां,सच्चिदानंदाऽऽत्मज्ञप्तिवैशद्योद्यानविचरणरसिकानां, सिद्धान्तितसंसंद्धिस्वरूपाऽऽपन्नतत्वानाम्, विविधविचित्रविद्याविद्योतितान्तःकरणानां मनोरंजनार्थमत्र कश्चित्प्रयासः शोधप्रबन्धमाध्यमेन क्रियते ।

तत्र सर्वप्रथमं निखिलहेयप्रत्यनीकस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपस्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येयकल्याणगुणगणमहोदधेः भगवतः श्रीस्वामिनारायणस्य जीवनवृत्तं प्रप्रथमं मंगलमाध्यमेन विलिख्यते ।

## उद्‌गातुः जीवनवृत्तम्

एकदा बदरीवने मरीच्याद्या महर्षयः दर्शनार्थमुपाजग्मुः प्रभोः नरनारायणस्य। प्रभुं नत्वार्चयित्वा च ते तदंतिके निषेदुः, तद्धितकृत्तपाः प्रभुः तान् भारतवर्षस्य क्षेममपृच्छत्, तदा ते महर्षयः तं सकलैश्वर्यसम्पन्नं प्रभुं भुवि जायमानमसुरोपद्रवं कलिकलुषितबलसञ्जातभ्रष्टमतिमतां मानवानां वर्तनं च प्रोचुः, तावद्धर्मोऽपि (प्रभोः पिता) स्वभार्यया मूर्त्या सह तत्राऽऽगात्, तं दृष्ट्वा सोद्धवस्तत्र निषण्णो भगवानपि स्वपितरं मानयित्वोपावेशयदासने तथा च मुनिभिः प्रोक्तं सकलवृत्तान्तं श्रावयामास, तेष्वेवमेकाग्रचित्तेषु श्रृणवत्सु तद्वचः दुर्वासास्तद्दिदृक्षया तदैव कैलासादभ्यगात् परंतु भगवन्मुखदत्ताक्षाः पिबन्तस्तद्वचोऽमृतं ते समाधिस्थिता इव तमागतं क्रोधमूर्तिं न ददृशुः, वार्तासक्तमानसत्वात् नारायणोऽपि तं नापश्यत्, तदा मुनिरात्मानमपमानितं मेने, मानभंगसमुद्‌भूतक्रोधाग्निविवशः दुर्वासा उर्ध्वदोरुच्चतर्जनिः तान् सर्वानपि (भगवन्तमपि) शशाप – यस्मात् भवद्‌भिः मे न सम्मानं कृतं ततः सर्वेऽपि मानुष्य-आसुरीं पीडां शीघ्रं प्राप्स्यथ, तच्छ्रुत्वा सहसैव सर्वे व्यग्रचेतसो बभूवुः तथा च धर्मः सद्यः समुत्थाय तं प्रणम्याऽक्षमापयत्, तथोक्तमेवंमधुरवचनैः महर्षे ! बुद्धिपूर्वकं नाऽस्माभिरपमानितोऽभूः । अतोऽस्माकमुपरि त्वं कर्तुमर्हस्यनुग्रहम्, धर्ममुखोद्‌भूतवचनसंश्रवणाप्लावितकिञ्चित्चित्तवानयं दुर्वासानुग्रहं कुर्वन्निदमब्रवीत् – धर्म ! श्रृणु, अज्ञानजोऽपि मे शापो नान्यथा भविता । किन्तु सर्वज्ञो ह्येष नारायणः मोचयिताऽस्तु वः । भुवि मनुष्यभूतयोः दम्पत्योर्वामसौ पुत्रो भूत्वा युवां मुनिश्चैतानसुरेभ्योऽविता, इत्युक्त्वा नत्वा च प्रभुं पुनः सः श्वेताचलं ययौ । शापादाकस्मिकाद् भीतं वृषादिकं भगवानाह- निष्कारणमिमं शापं निवारयितुं समर्थोऽस्मि परंतु ममेच्छयैवासौ सञ्जातः, भारतवर्षे कलेः बलं प्राप्याधर्मश्चासुराः संत्येधितास्तदुच्छेदः साम्प्रतं मे चिकीर्षितः, अतोऽहं त्वत्सुतो भूत्वा तदुच्छेदं सामाचरन् मनुष्यभूतान् सर्वान्वो रक्षिष्यामि नात्र सन्देहः, अतो सर्वेऽपि गृह्णन्तु भुविमानवदेहानिति सञ्चोदितास्ते मानवेषु जन्म अगृह्णन् ।

कोसले देशे पुरमिट्टारसंज्ञकमस्ति तत्र बालशर्माभिधः द्विजसत्तमः पण्डितोपपदः सामवेदी सावर्णिगोत्रजः सारवज्ञातिरखिलशास्त्रविद्धर्मसंस्थितिः बभूव। भाग्यवती नाम्ना तस्यासीच्च पतिव्रता भार्या, मुनिशापतः धर्मदेवः तयोः पुत्ररत्नरूपेण विक्रमार्कक्ष्मेशशके रसांकनगभूमिते (१७९६) प्रबोधन्यामेकादश्यां

मध्याह्ने प्रादुरास, पिता द्वादशेऽह्नयकरोत् तन्नाम देवशर्मेति । तस्मिन्नेव जनपदे छुप्पयाख्य उत्तमः ग्रामोऽस्ति तत्र बालशर्माभिधः ब्राह्मणोऽभूत् शुद्धबुद्धिः । भवान्याख्या तस्य भार्यासीत् । मुनिशापाद् वृषांगना मूर्तिः तयोः पुत्रीरूपेण शकाब्देऽष्टांकसप्तेंदुप्रमिते (१७९८) कार्तिके पौर्णमास्यां दिनांतेऽजायत, प्रेमवती नामाख्या सा बाल्येऽपि कृष्णभक्तौ निरता नितरामभूदत एव भक्तिरिति जगतीतले ख्याता बभूव। अथ बालशर्मा बुद्धिशीलगुणान्वितां स्वां कन्यां देवशर्मणेऽनुरूपाय विधिवत्प्रददौ, जामातारं सम्प्रार्थ्य च स्वगृहेऽवासयत्, देवशर्मापि गृहस्थधर्मानखिलान्सपत्नीको यथाविधि आचचार, अतो लोके धर्मसंज्ञामवाप। सुमेधसः लोकाः तमेवैकं धर्मनिष्ठः कृष्णभक्त इति सर्वदा बहु मेनिरे, तदा असुरांशाः मत्सरिणो दुष्टा. अतिनिर्दयाः सभार्यं तं मुहुः पीडयामासुः, ततो तद्ग्रामाद् सपत्निकस्तीर्थयात्रामुद्दिश्य निर्गतः स उपेयाय वृन्दावनम्, तावत्तत्र मरीच्याद्यामुनिशप्तामहर्षयः तत्र तत्र नृषूत्पन्ना दैत्यपीडिता आययुः, समदुःखैरुपेतस्तैः धर्मस्तत्र कृष्णमाराधयामास, तेभ्यः साक्षात् स्वदर्शनं दत्वा श्रीकृष्ण इदमुवाच यत् - यूयमचिरान्निर्भया भविष्यथ, कृष्णावतारे मया भूरिशः असुरा निहिताः, तेषु ये तीव्रवासनाः ते मयि निबद्धवैराः साम्प्रतं भुवि जाताः, युष्मान् मामकान्ज्ञात्वैव भृशं पीडयन्ति तेषामुच्छेदो नारायणर्षिरूपेण त्वत्पुत्रतामहं प्राप्य हरिकृष्ण इति ख्यातः करिष्ये, धर्ममैकान्तिकं भुवि विस्तारयन्वः रक्षणं च करिष्ये, इत्युक्त्वा कृष्णस्तिरोदधे । अथ अचिरेण कालेन भगवानसुरांतकः भक्तानन्दमहोदधिः भक्तावाविरासीत्, नगाग्निवस्विंदुमिते (१८३७) शके चैत्रशुक्लनवम्यां पंचमे मूहूर्ते निश्यभूदाविः। तदा धर्मगृहे कुसुमान्यभिवर्षन्तो दुंदुभिः स्वानवादयन् दिवौकसः महोत्सवोऽभूत्, हर्षादप्सरसोऽनृत्यन्, गन्धर्वकिन्नराः जगुः, महर्षयः आशिषो ददतः वेदघोषं चक्रुः, धर्मः जातकं कृत्वा विप्रेभ्यः दानानि ददौ, तदाभूज्जगतीतले सर्वत्र आनंद एव । षष्ठे दिने तत्र तं प्रभुं जिघांसुः बालग्रहाः कोटरादयः असुरप्रमुखकालिदत्तप्रेरिता आययुः, तान्स्वदृष्ट्यैव दहनद्धावयत् बालप्रभुः, शतरात्रव्यतिक्रमे मार्कन्डेयो महामुनिः तत्रैत्य पित्र्यांभ्यर्च्याभ्यर्थितः विभोः नामकर्माकरोत् ।

निजाश्रितापद्धरणात्, कर्कराशिजनेरपि ।
हरिरित्यभिधां तस्य, स चकारादितो मुनिः ॥

स्वस्मिन्भक्तहृदाकर्षाच्चैत्रमासजनेस्तथा ।
कृष्णवर्णाच्च विदधे कृष्ण इत्यभिधां ततः ॥

चंद्रोपमः सदाह्लादे दैत्यत्रासे यमोपमः ।
भवितेत्यभिधां चक्रे हरिकृष्ण इति द्विजः ॥

त्यागज्ञानतपोयोगैर्भविता शंकरोपमः ।
बालोऽसावित्यसौ चक्रे नीलकण्ठाभिधां ततः ॥

द्वात्रिंशल्लक्षणैश्चैष भाव्यो भूरि जनेश्वरः ।
सर्वेषां वः कष्टहर्त्तेत्याह धर्मं ततो मुनिः ॥

ततः सद्वस्त्रभूषाद्यैः धर्मेण सम्मानितः मुनिः प्रयागं प्रययौ । बालोहरिरपि बाललीलया मातृपितृज्ञातिजनानान्दयन् बालचन्द्रवत् प्रतिदिनं ववृधे, तस्य हरेः यथाकालं यथाविधि अन्नाशनादीन् संस्कारान् पिता हरिप्रसादः समहोत्सवं क्रमशश्चकार । अथ तृतीयेऽब्दे चौलांते, जिधांसुः कालिदत्तोऽसुरराडाजगाम, तं दृष्ट्यैव मुह्यन्मुहुर्भ्रान्त्वा ममार, एवं विधानेकासुरोपद्रवाद् भीतो धर्मः तं ग्रामं विहाय सभार्यः ससुतोऽयोध्यामेत्यावासमकरोत् । तत्राष्टमेऽब्दे कृतोपनयनो हरिः स्वपितुः धर्मतः सांगवेदपुराणादीन्कालेनाल्पेनाधीतवान्, एकादशसंवत्सरे मात्रे धर्मज्ञानविरागाढ्यां भक्तिमुपदिश्य तस्यै दिव्यां गतिं ददौ । तदनन्तरं पित्रे यथावत्स्वज्ञानं दत्वा तस्मा अपि प्रभुः दिव्यां गतिं ददौ, एवं विप्रशापतः तौ मोचितौ । अथ तीव्रवैराग्यवेगतः तपसे कृतसंकल्पः अनापृच्छ्यैवैकाकी निर्ययो, सरयूमुत्तरन् स्वक्षेपकदैत्यं मोहयन् हिमालयोपत्यकासु चरन् कतिपयैर्दिनैः स मुक्तनाथं सम्प्राप्य तत्राकरोत्तपः, मासान्कतिपयांस्तत्र स्थित्वोग्रेण तपसा साक्षादहस्करं प्रासादयत्, ततो शार्दूलादिभयंकरे महत्यरण्ये विचरन् सः गोपालसंज्ञं योगीन्द्रं वटाधस्ताद् ददर्श, प्रीत्या तेनातिमानितः वर्षमेकं तदंतिके वसन्नष्टांगयोगस्याभ्यासमादराच्चकार, अल्पकालेन सिद्धयोगावसौ तस्मै स्ववेदनं दत्वा सिद्धगतिञ्च प्रापप्यादिवाराहमगमत्, तीर्थानि विचरन् तपः कुर्वन् नीलकण्ठः यत्रासीत्सिद्धवल्लभो भूपः तं सीरपुरं प्राप्तः राज्ञाऽतिमानितस्तत्र चातुर्मास्यमुवास, सिद्धाभिमानिनामसुराणां दर्पमपनुदन् तदभिचारतः साधुं गोपालदासख्यमावत्, दुष्प्रतिग्रहकृष्णांगं विप्रमघादमोचयच्च । ततः देव्याः

कामाक्ष्याः समीपग्राममाययौ, तत्र महाकाल्या उपासकः मंत्रयन्त्राभिचाराद्यैः स्वग्रामागततैर्थिकान् मान्त्रिकानपि यश्चक्रे स्वशिष्यान् तं महाभिमानिनं स्वस्मिन्मंत्रदेवताः युञ्जंतं पिबैकारव्यमसुरं हरिस्स्वौजसाऽपराजितः शिष्यमेव चक्रे, ततो नीलकण्ठः नवलक्षाख्यपर्वतं ययौ, तत्रत्यान् सिद्धान् नवलक्षपरिमितान् नवलक्षरूपेण स्वात्मानं कृत्वालिङ्गनं दत्वा च तानमोदयत् । अथ गंगासागरमेत्य कपिलस्येक्षणं कृत्वा तत्र मासमुवास, ततो जगन्नाथपुरीं प्राप्य मासान्दशावसत्, तदतिक्रमविभ्रान्तास्तत्रत्याऽसुरास्तु सद्यः परस्परं शस्त्रास्त्रैर्निहत्य सहस्त्रशः निधनं प्रापुः । एवं आदिकूर्म - मानसपत्तन - वेंकटाद्रि - कांची - श्रीरंगक्षेत्र - सेतुबन्धरामेश्वर - भूतपुरी - कुमारिकाक्षेत्र - पद्मनाभ - आदिकेशव - साक्षिगोपाल - पुण्डलीकपुर - दण्डकारण्य - अम्बलेश्वर - भीमनाथ - गोपानाथादितीर्थेषु विचरन् कलिबलसमभ्युत्थिताधर्म विखण्डयन् धर्मज्ञानवैराग्ययुक्तां भक्तिं मण्डयन् १८५६तमे विक्रमसंवत्सरे नभोवदि षष्ठयां लोजपुरं प्राप । तत्रोद्धवावतारस्य श्रीरामानंदवर्णिनः मुक्तानंदादयः शिष्याः तं बहु मेनिरे, असौ हरिरपि तान् साधुलक्षणसम्पन्नान् ज्ञात्वा तैः सह कतिचिन्मासानुवास । नवमासानन्तरं पिप्पलाह्वये ग्रामे गुरुवर्यरामान्दमुनेरागमनं श्रुत्वा तैः साधुभिः साकमचिरेणैव प्रेमाश्रुनेत्रः पुलकावृत्तांगः सन् तं द्रष्टुमाययौ, ज्येष्ठासितद्वादशिकादिनेऽसौ तं नैष्ठिकवर्णिवेषं सिताम्बरधरमाजानबाहुयुगलं ददर्श । तेन भृशं मानितोऽसौ तं भक्त्या प्रणम्य तस्यैव पार्श्वे निषसाद, अतिकृशतनोस्तस्याखिलं वृत्तान्तं चापृच्छत् रामानन्दमुनिः । सोऽथाशेषं स्व वृत्तान्तमनुक्रमेणाकथयत्, तदाकर्ण्यातिमुदा रामानन्दस्वामी अप्याह - अहो ! अस्मदीयोऽसि त्वं, त्वत्पिता धर्मो प्रयागे मत्प्राप वैष्णवीदीक्षामिति, स्वगुणैः ताताधिकोऽसि, सज्जनात् श्रुतपूर्वोऽसि, यथासुखं वसात्रेति, एवंप्रकारकं तद्वचनं श्रुत्वा प्राप्तानन्दो हरिरपि तमानन्दयन् तत्रावसत् ।

एकादश्यां प्रबोधिन्यां दीक्षां भागवतीं ततः ।
स प्रापाथ गुरुस्तस्य नामद्वितयमाह सः ॥

सहजानन्द इत्येकं सदानन्दस्य दर्शनात् ।
अन्यन्नारायणमुनिरिति तद्गुणदर्शनात् ॥

अथ गुरुवर्यरामानन्दस्वामी अपि स्वयं तस्य निर्दोषतां, धर्मपालनसामर्थ्यं, गरीयसीं साधुतां च दृष्ट्वा स्वीयां धर्मधुरां तस्मिन् सर्वसद्गुणमण्डिते साधुजनप्रिये नैष्ठिकेन्द्रे न्यधात्, तथा च मार्गशुक्लत्रयोदश्यां स्वयं योगधारणया मानुषं देहमुत्सृज्य विशालामगमत् । ततः गुरोः यथा विध्यौर्ध्वदैहिकं कृत्वा स्वगुरोराश्रितान्साधुन्वर्णिनो गृहिणश्च सच्छास्त्रस्योपदेशेनादरात् समभावयत्, स्वप्रतापेन तेषां चेतांसि स्वस्मिन्समाकृषच्च । ततः नानादेशेषु विचरन् वृषवैरिणमुत्खनन् वादैः असुरांशगुरून् जित्वा पापकृतो बहून् सद्धर्मे वर्तयामास, तस्यालौलिकैश्वर्यमवेक्ष्य सर्वेषु देशेषु नराश्च नार्यः तदाश्रयं विधाय तदीक्षयैवाकृतासाधनास्ते सद्यः समाधिमभिलेभिरे, जज्ञुस्तमेवाखिलकारणं च, समाधौ च प्रभुः कांश्चिच्छ्रीकृष्णरूपं गोलोकेऽक्षरधामस्थितं लक्ष्मीराधाद्युपेतं, कांश्चित् वैकुण्ठे लक्ष्मीनन्दादिसेवितं स्वं विष्णुरूपं, कांश्चित् श्वेतद्वीपेऽमृते निरन्नमुक्तोपेतं स्वं वासुदेवरूपं, कांश्चित् अव्याकृते लक्ष्मीकीर्त्यादिशक्तिभिः युक्तं स्वं भूमरूपं, कांश्चिन्नारायणर्षिरूपेण बदरीवने संस्थितं नरादियुक्तं स्वं निर्झररूपं, कांश्चित् क्षीरवारिधौ लक्ष्म्यादियुक्तं स्वं योगेश्वररूपं, कांश्चित् हिरण्यमयाख्यपुरूषरूपं स्वमादित्यमण्डलस्थितम्, कांश्चिदाग्नेयमंडले संस्थितं यज्ञपुरूषरूपम्, कांश्चित् द्रष्टाख्यं सच्चिदानंदलक्षणमवस्थात्रितयातीतं ब्रह्मरूपम्, कांश्चित् वैराजरूपेण स्थितं स्वं, कांश्चिच्च द्वीपखण्डाधिदेवताः, षड्चक्रदेवता इत्यादिकं क्रमेणादर्शयत्। क्वचिद् दूरस्थभक्तैः स्वगृहे स्वप्रतिमांतिके धृतनैवेद्यमाश्चर्यंजनयन्बुभुजे, क्वचिद् भक्तान्न्तकाले स्वाधामनिनीषुः तद्ग्राममेत्य साक्षात्स्वमैक्षयत् । अलौलिकैश्वर्यमित्थं दृष्ट्वा सहस्त्रशो जनास्साश्चर्यं प्रभुं विविदुः, स्वं स्वं मतं स्वस्वगुरुं च हित्वा ते दीक्षाग्रहणपूर्वकं तमेव प्रत्यक्षं भेजुः, बहवो मतवादिनः वादेन तं जेतुं न शेकुः तदा नत्वा प्रांजलयः प्रोचुः -

"त्वमेवैकोऽसि भगवानिति विद्मोऽद्य निश्चितम् ।
दिदृक्षामः स्वेष्टदेवान् कृपया तान्प्रदर्शय ।।

अथ तत्कृपया सद्यः समाधिं प्राप्य ते हृदि ।
स्वस्वेष्टदेवान्ददृशुः स्वस्वशास्त्रश्रुतान्पृथक् ।।"

यथा रामानुजीयाः श्रीमन्नारायणम्, वल्लभीयाः माध्वाः नैंबादित्याश्च वैष्णवाः वृन्दावनविहारिणं बालकृष्णम्, शांकराः ब्रह्मज्योतिः, रामभक्ताः कौसल्यानन्दनं, शैवाः पार्वतीकांतं, सौराः हिरण्मयं, शाक्ताः दैवीरूपं, गाणपत्याः गणाधिपम्, यवनाः पिगाम्बरम्, जैनास्तीर्थंकरं च तं ददृशुः, व्युत्थितास्तेऽथ तं सर्वावतारकारणं जज्ञुः, ततस्तदाश्रयं कृत्वा तमेव प्रत्यक्षपुरूषोत्तमनारायणं भेजुः । सोऽपि प्रभुः आढ्यैः गृहिभिः स्वभक्तैरन्नसत्राण्यचीकरत्, यथाविधि विष्णुयागमहारूद्रांश्च, तत्र सहस्त्रशः ब्राह्मणान् मिष्टान्नैरतितृपत्, भूरिशः दानानि दापयामास च । यत्र यत्राचरद् भूमौ स अहिंसयज्ञप्रस्तोता तत्र तत्र स्वभक्तान् सच्छास्त्राणां रहोऽखिलं, वर्णाश्रमात्मकं भागवतात्मकं च धर्मं, आत्मपरमात्मज्ञानं, वैराग्यम्, उत्तमां भक्तिम्, सभेदं सविस्तरं यथावत्कथयामास । एवं भक्तानानन्दयन् स वात्सल्यवारिधिः दुर्ग पत्तनेऽभयक्ष्मेशतत्पुत्रभक्तिवश्यस्तदालयेऽवसत् प्रायशः । तत्र जन्माष्टम्यन्नकूटादीन् महोत्सवान् महद्भिः संभारैः सोऽनुवर्षमकारयत्, तस्मिन् नैकदेशतः साधवः वर्णिन गृहिणश्च तद्दर्शनार्थमाजग्मुः, ते च तं महाप्रभुं नानाविधांशुंकाभूषागंधपुष्पस्त्रगादिभिः यथाशक्ति यथोचितं पुपूजुः। भगवानपि तान् भक्ष्यभोज्यलेह्यशोष्यात्मकैः बहुविधैरन्नैः तर्पयामास । उत्तमेषु श्रीनगर - भुज - वृत्तालय – धवलपुर - जीर्णदुर्ग - दुर्गपत्तनाख्येषु नगरेषु मन्दिराणि च कारयित्वा लक्ष्मीनारायणादीन् प्रतिष्ठापयामास । अनेकानि शिक्षापत्र्यादीनि सच्छास्त्राणि स्वयंकृतवान् कारितवान् च ।

[१]"एवं भूतेन वसता हरिणा दुर्गपत्तने ।
सुधा तुल्यानि वाक्यानि यानि प्रोक्तानि भूरिशः ।।

ततो ग्रामान्तरं गत्वा यानि प्रोक्तानि तेन च ।
धर्मज्ञानविरागात्मदृढभक्तिमयानि ह ।।

कतिचित्तेषु दृभ्यंते यथामति यथाश्रुतम् ।
तदेकांतिक भक्तानां प्रीत्यै पद्यैर्मनोरमैः ।।

---

१ श्रीहरिवाक्यसुधासिन्धोः उपोद्धातप्रकरणे श्लो. ३२५ - ३२८

समासतः प्रोक्तमिदं चरित्रं, श्रीधर्मसूनोरिह यो मनुष्यः ।
पठिष्यति श्रोष्यति वापि भक्त्यास लप्स्यते वै पुरुषार्थसिद्धिम् ॥

## संक्षेपः -

एकादशसंवत्सराधिकमासत्रयमेकाहश्चैतावत्कालपर्यन्तं श्रीहरिकृष्णभगवान् सरवार्यदेशान्तर्गतश्रीभक्तिधर्मभुवने न्यवसत्, सप्तवर्षाधिकैकमासेन सहैकादशाहानि श्रीहरिः वनं विचचार, दशमासाधिकषडहानि लोजपुरे श्रीमुक्तानन्द स्वामिना सह निवासं चक्रे, एक संवत्सराधिक पञ्चमासेन सह षड्विंशत्यहानि सोरठदेशे गुरुवर्यश्रीरामानन्दस्वामिना सह न्यवसत्, अष्टाविंशत्यधिकपञ्चमासेन सह सप्तविंशत्यहानि स्वाश्रितानां सुखं ददत्सन् कल्याणकृच्चरित्राणि कुर्वन्श्रीहरिः सत्संगे व्यराजत । एकोनपञ्चाशदधिकद्विमासेनसहैकाहः (४९ वर्षाणि २ मासौ १ अहः) श्रीहरिः भूमण्डलेऽस्मिन् न्यवसत् । श्रीदुर्गपुरेऽष्टादशशताधिकषडशीतितमे (१८८६) संवत्सरे ज्येष्ठमासीयशुक्लपक्षदशम्यां तिथौ स स्वामिनारायणो भगवान् स्वेच्छयाऽन्तर्धानं भूत्वा सर्वोपरिस्वाक्षरं धाम जगाम । अथ ग्रन्थकर्तुः शतानन्दमुनेः जीवनमुपवर्ण्यते ---

## ग्रन्थकर्तुः शतानन्दमुनेश्चरितम्

यस्यार्षं चक्षुरासीदपि गतिरभितः सिध्ददेहस्य योगात्,
येन प्राप्ता समाधिस्थितिरपि सहजानन्ददिव्यप्रसादात् ।
शिक्षापत्र्याः सुटीकां भगवदभिमतां तच्चरित्रामृतैक -
व्याप्तं ग्रन्थं च चक्रे स जयति शतानन्दनामा मुनीन्द्रः ॥

विज्ञानधर्मवैराग्यभक्तिपीयूषसम्भृतम् ।
सत्सङ्गिजीवनं येन, मुनिना सुष्ठुनिर्मितम् ॥

भगवत्सहजानन्दकृपालब्धार्षचक्षुषः ।
शतानन्दमुनेस्तस्य चरित्रमुपवर्ण्यते ॥

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभावः

आध्यात्मिकतत्वविवेचनपरिपूर्णस्य साक्षात्पूर्णपुरुषोत्तमनारायणमुखोद्भूतस्य च हरिवाक्यसुधासिन्धोः लेखकोऽस्ति शतानन्दमुनिः, मुनेरस्यजीवनवृत्तं तस्यैव शिष्यप्रवरेण सुव्रतमुनिना सत्सङ्गिजीवननामकग्रन्थे प्रथमप्रकरणे द्वितीयतृतीयाध्याययोः नरपुङ्गवप्रतापसिंहेन पृष्टे सति कथितमस्ति तद्यथा -

अस्त्यवन्याममलयशवति ब्रह्मविदग्रेसरेण जनकेन पुराधिष्ठिताऽत एव सर्वतो विख्याता पुण्यतमा मिथिला नाम नगरी, तस्यामभूद् स्वधर्मनिष्ठभूसुरकुलभूषणमधीतवेदवेदाङ्गः विष्णुदत्तनामकः श्रीहरेः भक्तराट्, तस्यैव गृहे तस्यैव पुत्ररत्नरूपेणाविरासीदयं मुक्तात्मा । (मुनेरस्य प्रादुर्भाव. कदा सञ्जातमिति जिज्ञासायाः सुष्ठूत्तरं न कुत्रापि सम्प्राप्यते तथाप्येतत् तु निश्चितमस्ति यत् मुनिरयमष्टादशशताब्दे बभूव) आबाल्यादेव विषयतो विमुखः सम्मुखश्चात्मस्वरूपचिन्तने शास्त्रप्रतिपादितधर्मैकपरः परिगृहीतनैष्ठिकब्रह्मचर्यः सः ब्रह्मनिष्ठं स्वपितरमेव गुरुं मत्वा तत्चरणकमलसामीप्ये निवसन् तस्मादेव शास्त्राध्ययनंचकार,अल्पेनैवकालेनाच्युतप्रदत्तमेधयाभ्यस्तसकलशास्त्रोऽधिगतसदसद्विवेकः शास्त्राणां ([1] "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" [2]"तद्यथेह कर्मचितोलोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" [3]"अन्तवदेवास्य तद्भवति" [4]"नह्यध्रुवैः प्राप्यते" [5]"प्लवा ह्येते अदृढा यज्ञरूपाः" [6]"परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन" "तद् विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" "तस्मै स विद्वान्नुपसन्नाय सम्यक्प्रशांतचित्ताय समन्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्वतो ब्रह्मविद्याम् ) विविधवचनैराकृष्टचित्तः तथा च नित्यामृततत्त्वप्रतिपादकश्रुतीनां [7]"ब्रह्मविदाप्नोति परम्" "न पुनर्मृत्यवे तदेकं पश्यति" [8]"न पश्यो मृत्युं पश्यति" [9]" स स्वराड् भवति" [10]"तमेवं विद्वान् अमृत इह भवति"

---

१ गीता - अ,९ श्लो. २१
२ छान्दोग्योपनिषत् ८/१/ ६
३ बृहदारण्यकोपनिषत् ५/८/९
४ कठोपनिषत् २/१०
५ मुण्डकोपनिषत् १/२/७
६ मुण्डकोपनिषत् १/२/१२, १३
७ तैत्तिरीयोपनिषत् आन. २/१/१
८ छान्दोग्योपनिषत् ७/२६/२
९ छान्दोग्योपनिषत् ७/२५/२
१० तै. पुरूषसूक्त २०

[1]"पृथगात्मानं प्रेरितारं च मत्वा" इति पौनःपौन्येन विचारणेन सञ्जातपरमात्मप्रत्यक्षेक्षणोत्सुकः सः रहसि स्थित्वा सकलशास्त्रशिरोमणेः भागवतस्याध्ययनं करोति स्म, अथ कदाचित् श्रीमद्भागवतपञ्चमस्कन्धाध्ययने प्रवृत्तस्यास्य संस्मृतिरियमभवत् - स खलु परमात्मा सर्वकारणकारणं निखिलहेयप्रत्यनीककल्याणैकतानः, स्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैक-स्वरूपः, स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृत्यसंख्येय-कल्याणगुणगणमहोदधिःस्वाभिमतानुरूपैकरूपाचिन्त्य-दिव्याद्भुतनित्यनिरवद्यनि-रतिशयौज्ज्वल्य - सौगन्ध्य - सौन्दर्य - सौकुमार्य - लावण्य - यौवनाद्यनन्तगुणनिधिदिव्यरूपः, स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्या-परिमितदिव्यभूषणः, स्वानुरूपासंख्येयाचिन्त्यशक्तिनित्यनिरवद्यनिरतिशयकल्याण-दिव्यायुधः, विविधविचित्रानन्तभोग्यभोक्तृवर्गपरिपूर्णनिखिलजगदुदयविभवलय-लीलः परंब्रह्म पुरुषोत्तमो नारायणः भरतखण्डे बदरिकाश्रमे नारादादिमुनिमण्डलसंसेविताङ्घ्रिः सनरः तपति तपमाकल्पं स्वभक्तजनहिताय केवलकरुणया, तच्चरणपरिचरणे प्रवृत्तानां तदपरोक्षानुभवो हि सुगमः ।

एवं प्रकारकशास्त्रवचनविश्वस्तचित्तः श्रीहरेः प्रत्यक्षदर्शनोत्सुकः शतानन्दः केवलभगवद्दर्शनाभिलाषया तैर्थिकैः सह बदरिकाश्रममगुः, मिथिलातो निर्गतः सः मुनिरक्षयाख्यतृतीयायां नारदकुण्डाद्यनेकतीर्थपरिवृतं, विष्णुपादोद्भवया लोकत्रयं पवित्रयन्त्या गङ्गया समलंकृतं बदरिकाश्रमं प्राप । तत्र स्मरणमात्रेणैव निखिलाघसंहंत्र्यां गङ्गायामावगाहनं विधाय प्रेमाश्रुपूरितनेत्रः पुलकावृताङ्गः सन् विशालाधिपतेः दर्शनं चकार । गते सति समेषु तैर्थिकेषु वर्णिराडयं प्रारभत् श्रीहरिं प्रसादयितुम् । केनप्रकारेणाराधयति स्म सः तदुक्तं सुव्रतमुनिना सत्सङ्गिजीवने -

> [2] **विधाय नैत्यकं कर्म, प्रत्यहं पुरतो हरेः ।**
> **पपाठ दशमस्कन्धं, सम्पूर्णं विधिवत्सुधीः ॥**
>
> **एवं तमाराधयतः, कन्दमूलफलाशिनः ।**

---

१ श्वेताश्वतरोपनिषत् १/६

२ सत्सङ्गिजीवनम् प्र. प्र. अ. र. श्लो. ३०, ३१

व्यतीयुस्तस्य षण्मासा, दीर्धदृष्टेरखिद्यतः ॥

प्रबोधिन्यामेकादश्यां दिवा पाठार्चनादि विधाय निराहारः सः निशि जागरं चक्रे, तस्मै प्रसन्नः भगवान् दययात्मीयवपुः यं श्रुतिरेवमाख्यापयति यत् [1] "यतो वातो निवर्तन्ते अप्राप्य मनसा सह" तथा च स्मृतिः "योगीनामप्यगम्यम्" [2] "मुक्तानां परमा गतिः" इत्यादि, एतादृशं सुदुर्लभतरं सहोद्यतानेकदिवाकराभं द्विभुजमदीदृशत्, तमवलोक्य सहसा विस्मितः सः "अयमेव भगवान् विशालाधिपति"रित्यवेत्य सञ्जातपरमानन्दः प्रेमाश्रुपूर्णनयन समुदञ्चितरोमाञ्चः प्रणम्य विनयावनतसर्वगात्रः बद्धाञ्जलिस्तुष्टाव- (स्तोत्रमिदमौद्धवीयेष्वतिप्रसिद्धमास्ते)

श्री वासुदेव इह सर्वमुमुक्षुलोकक्षेमाय निर्झरऋषिः करुणानिधिस्त्वं ।
आकल्पमाचरसि तीव्रतपांसि तं त्वां, नारायणं मुनिवरं बदरीशमीडे ॥

श्रीनारदादिमुनिमण्डलसेविताध्रिं, निर्नीडगाढदलसंकुलितां विशालाम् ।
अध्यास्यवेदहृदयस्य निरुपकं त्वां, नारायणं मुनिवरं बदरीशमीडे ॥

देवांगनागणवसन्तसुगंन्धिवातैर्युक्तः सुराधिपतिमोहक - गायकोधैः ।
कामोऽपि येन सहसा विजितश्च तं त्वां नारायणं मुनिवरं बदरीशमीडे ॥

यन्मानसंजिततपस्विगणोऽपिरोषः स्प्रष्टुंकथञ्चनकदाचननापशक्तिम् ।
तं त्वां च बिभ्यति यतोऽन्तरवैरिणोऽन्ये, नारायणं मुनिवरं बदरीशमीडे ॥

त्वं पूर्णकामपतिरप्यनुवासरं स्वं, दैवं च पित्र्यमपि कर्म करोषि काले ।
संग्राहयन्नखिलनैष्ठिकवर्णिनस्त्वां नारायणं मुनिवरं बदरीशमीडे ॥

यस्मात्प्रवर्तत इहाखिलसौख्यहेतुः सच्छास्त्रवृन्दमखिलं खलुनैष्ठिकेन्द्रात् ।
यत्कर्मदुष्करममर्त्यगणैश्च तं त्वां, नारायणं मुनिवरं बदरीशमीडे ॥

ये ये निवृत्तिमुपयान्तिविरागवेगात्, संसारभीतिजनितादधिभूमि ते ते ।

---

१ तैत्तिरीयोपनिषत् २/४/५
२ विष्णुसहस्त्रनाम् १५

यस्याश्रयेण सुखिनोऽत्र भवन्ति तं त्वां, नारायणं मुनिवरं बदरीशमीडे ॥

यत्पादपद्‌ममकरन्दरसैकलुब्धो, ब्रह्माण्ड - सौख्यमखिलं हि कदाचिदेव ।
रंकोपि नेच्छति सुखाम्बुधिमेव तं त्वां, नारायणं मुनिवरं बदरीशमीडे ॥

एवं प्रकारकतत्स्तुतिवचनेन प्रसन्नो भगवान्नारायणः विदन्नस्याशयमिदमुवाच - ते प्रीतोऽस्मि, त्वं मद्‌वरमिप्सितं वृणिष्वेति । तदा स अकारणकरुणावरुणालयं प्राह गद्‌गद्‌गिरया -

[1]यदि प्रसन्नोऽसि विभो, वरो देयश्च मे तदा ।
रक्ष मां स्वान्तिके नित्यं, देहि सेवां त्वमात्मनः ॥

गुणगानं तवेवैह, कर्तुमिच्छामि पार्श्वगः ।
साफल्यं येन वचसः, शुध्दिस्स्याच्चान्तरात्मनः ।

सिध्द्यैश्वर्यादि नेच्छामि, त्वत्तोऽहं किमपि प्रभो ।
सांसारिके विरक्तोऽस्मि, सुखे मायामये ध्रुवम् ॥

श्रुत्वेदं मन्दस्मिताननः स्वयमक्षराधिपतिरिदमुवाच - "सम्यक्तेऽध्यवसायोऽयम्" किन्त्वहं साम्प्रतमवन्यामुत्तरकौशलदेशेधर्मभक्त्यात्मजरूपेण नृनाटकं परिधृत्यानेकमुमुक्षुजनहिताय पश्चिमपाञ्चालदेशस्थदुर्गपुराख्यग्रामे भक्तजनगणावृतः सन् निवसामि, व्रज त्वं तत्रैव तथा च तस्य मम चरणपरिचरणपरो भव, तदेवं तव मनोरथं परिपूरयिष्यामि, तथा च तव मनसि यस्मात् मम चरितगुणगानेच्छा वर्तते तस्मात् त्वं सकलकल्याणैकमूलचरितपरिपूर्णस्य महाग्रन्थस्य लेखको भविष्यसि, एवं कथयित्वाच्युतः तिरोदधे ।

अथ स मुनिः प्रहर्षितः सन् द्वादश्यां पाराणां विधाय पश्चिमपाञ्चालाभिमुखः प्रतस्थे, मासद्वयानन्तरं स मुनिः गुर्जरदेशस्य श्रीनगरं

१ सत्सङ्गिजीवनम्. प्र. प्र. अ. ३. श्लो. १२, १३, १४

(कर्णावतीनगरीं - अहमदाबादाख्यनाम्ना नाधुनाप्रसिद्धं नगरम् ) प्राप, तत्र भोजन-दक्षिणाप्रियाणामनेकानां भूसुराणां वचनमिदं शुश्राव - "योऽसौ भगवान् नारायणावतारो विख्यातः स खलु हरिः स्वामिनारायणोऽधुना दुर्गपुराद्दर्भावतीनगरीं समागत्य परित्यक्तसमस्तदोषान्सर्वानाश्रितान् धर्मज्ञान-विरागादिनां समुपदेशैः समुज्जीवयन् वर्तते तथा च स्वयं धर्माचरणेन धर्मं भुवि संरक्षयन् प्रावर्तयन् च कमपि महान्तं यागं करोति। तदधुना सर्वैः मिलित्वा तत्र गन्तव्यं यतो वयं तत्र षड्रससम्पृक्तमुत्तमं भोजनं लप्स्यामहे, लप्स्यामहे च पूर्णां दक्षिणां भविष्यति च नस्तद्दर्शनञ्चेति ।

विश्रुत्य विप्राणां सरलतमां वाचं मुनिरयमतिसन्तुष्टः सन् विचारितवान् यत् नूनं यस्य वार्ता विप्रैः क्रियते स एव ममेष्टदेवः परात्परपूर्णपुरुषोत्तम इति कल्पयित्वा तैः विप्रैः सह सोऽपि दर्भावतीनगरीमगात्, प्राप्य च तां क्वचन रमणीयतमप्रदेशे प्रसारितस्यातिविशालस्ययज्ञमण्डपस्य समीपे रत्नेन्द्रैः खचिते हैमेऽतिवितते सिंहासने सिद्धासनेनारूढं परितः परमहंसैः चामरव्यजनहस्तैः परिचर्यमाणं नानादेशगतभक्ततजनैः पौष्पैः हारावतंसादिकैः सौवर्णैराभूषणैश्च सम्पूजितं सकलजनमनोनयनहारिदिव्यरूपं मन्दस्मितसुन्दरमुखारविन्दं भगवन्तं श्रीस्वामिनारायणमद्राक्षीत् । आनन्दमूर्तेः दर्शनादानन्दमग्नः सः स्वात्मानं धन्यातिधन्यतमं मन्यमानः तदैव भूमौ दण्डवत् पतित्वा प्रणनाम, बहुदूरादागतवन्तं विमलप्रेमपूरितान्तःकरणं तपसातिपूतकायं तं दृष्ट्वा भक्तवत्सलः श्रीहरिरपि "आगम्यताम् आगम्यताम्" इत्यादिकैः मधुरैः स्वागतवचनैः तं मानयामास स्वान्तिके वासयामास च। विविधविचित्रवासनाविरहितान्तःकरणं शुद्धबुद्धप्रगल्भं तं द्विजं कचिचित् दिनानन्तरं ददौ दीक्षां भगवान् श्रीहरिः स्वप्रदत्तवरदानसाफल्याय। सोऽपि स्वमनोरथफलमवाप्यानन्दितचित्तः यथा भगवतः मुखोल्लासवार्धक्यदर्शनं भवेत् तेनैव प्रकारेणातिश्रद्धया शुश्रूषां कारयामास। नित्यनवीनोत्साहेनैवं सुश्रुवतस्तस्य यमनियमासनप्राणायामप्रत्याहारध्यानादिकैः योगाङ्गैरपि साधितुमशक्या समाधिरपि भगवत्कृपयैव कालेनाल्पेन सञ्जाता। तस्याम् -

[1] ध्यायस्तं हृदि सोऽद्राक्षीत्, प्राग्दृष्टं बदरीश्वरम् ।
क्षणान्तेऽन्तर्हितः सोऽथ, यथा सौदामनी दिवि ॥

ज्योतिर्मयेऽक्षरे धाम्नि, स्थितं तं कृष्णमैक्षत ।
समग्रैश्वर्यसम्पन्नं, सपार्षदपरिग्रहम् ॥

गोलोकमथ वैकुण्ठं, श्वेतद्वीपादिधाम यत् ।
तदैक्षयत्सहैश्वर्यं, हरिस्तस्मा अलौकिकम् ॥

तथा च स्वमातापित्रोः भक्तिधर्मयोरवतरणेन सहान्येषामपि ऋषिणामवतरणं कुत्र कुत्र कथं वा सञ्जातमिति दर्शयित्वा यथा स्वयमाविरासीद् धर्मतः भक्तौ, यद्यच्च कृतवानद्यावधि तत्सर्वं तस्मै दर्शयामास, न केवलमेतावन्मात्रमपितु -

[2]ततोऽभूत् सोऽपि सर्वज्ञः, शतानन्दो महामतिः ।
यथावत्सर्वमवैन्मैत्रेयं स्वमृषिं तथा ॥

भगवत्करुणयालब्धसार्वज्ञः सः स्वात्मानं "अहं पूर्वं मैत्रेय आसमित्यपि" ज्ञातवान् इत्यर्थः ।

एकदा रहसि प्रशांतमुद्रायां स्थितवन्तं प्रभुं बद्धाञ्जिलिपुटः सन्निदमुवाच मुनिः हे प्रभो ! भवतो हि प्रादुर्भावदिव्यचरितं श्रवणमङ्गलं सकलजनकल्याणावहं भवपथगतागतश्रमापहं भाविजननिःश्रेयसाय निबन्धरूपेणोपनिबद्धुमस्ति मे मनोरथः, तत् त्वद्यशोगुम्फनेनैव स्वज्ञानं सफलीकर्तुमुत्काय मेऽनुज्ञां देहीति । निष्कपटभावेन याचमानं तं श्रीहरिराह - मया साकमायाहि त्वं दुर्गपत्तनं, तत्राहं कारयिष्यामि श्रीगोपीनाथभगवतः

---

१ सत्सङ्गिजीवनम्. प्र. प्र. अ. ३. श्लो. ३५-३७
२ सत्सङ्गिजीवनम्. प्र. प्र. अ. ३. श्लो. ४१

बृहन्मन्दिरम् । तस्मिन्नतिपावने मन्दिरे निवसंस्त्वं यथात्मानुभवं मम चरितपूर्णं सकलकल्याणैकमूलं शास्त्रं विरचयेः । इत्यनुज्ञातः सः तथैव कृतवान्, तथा च यदा श्रीगोपीनाथभगवतः मन्दिरस्य कार्यं सम्पूर्णमभूत् तदा श्रीहरिः तं प्रचोदयामास मुने ! करोतु ग्रन्थानिति ।

## शतानन्दमुनिविरचिताः ग्रन्थास्तेषां संक्षिप्तपरिचयः वर्ण्यविषयाश्च

सर्वजीवहिताय सनातनधर्ममूलसंवर्धनाय परमपुरुषार्थप्राप्तये च मुनिनानेन कृताः विविधाः ग्रन्थाः भगवच्चरित्रधर्मविरागज्ञानभक्तिपरिपूर्णाः। सद्ग्रन्थमाश्रित्यैवातिष्ठतेऽऽध्यात्मिकता जगति सर्वत्र, पूर्वकालीनव्यासादिभिः महर्षिभिरपि एतादृशी परोपकारभावनया एव विरचिताः पुराणादिकाः सद्ग्रन्थाः, ऋते चेभ्यः पवित्रतमभारतीयसंस्कृतेर्स्वप्नमपि द्रष्टुं न शक्नोति कोऽपि सज्जनः, किं बहुना जगति यत्र यत्र सरलता सौष्ठवं धार्मिकता सद्भावना वा दृश्यते तत्र तत्र सद्ग्रन्थाणामेवोपकारकत्वमस्तीति।

सर्वप्रथमं तावन्मुनिः भगवदाज्ञया भगवल्लिखितशिक्षापत्र्यारनुष्टुप्छन्दसि निबन्धनं चकार, प्रसिद्धमेतत् सत्सङ्गिजीवने यथा -

**[१]शिक्षापत्रीं मल्लिखितां,ग्रथनादौ त्वमञ्जसा।**
**पद्यैरानुष्टुभैरेव, महाग्रन्थं ततः कुरु ।।**

भगवता प्रचोदितः [२] शतानन्दमुनिः १८८५ तमे संवत्सरे धनत्रयोदश्यां (आश्विनकृष्ण १३) परमपुरुषपुरुषार्थसंसाधिकां शिक्षापत्रीमनुष्टुप्छन्दसि गुम्फितुमारेभे तथा च यमद्वितीयायाः दिने (कार्तिकशुक्ल २) द्वादशोत्तरशतद्वयश्लोकात्मिकां शिक्षापत्रीं विरचयित्वा भगवन्तं दर्शयामास, श्लोकनिबद्धायाः शिक्षापत्र्याः श्रवणेन नितरां सन्तुष्टः प्रभुः तस्मै भृशमाशीर्वादं ददौ ।

१ सत्सङ्गिजीवनम्. प्र ५ अ. ६६ श्लो. ३२
२ सत्सङ्गिजीवनम् प्र. ५ अ. ६७ श्लो. १, २

औद्धवीयानामाचारसंहिता एव शिक्षापत्री, परंतु न सा औद्धवीयायेव केवला, परंतु समेषां मुमुक्षुणां कृते सा अत्युपकारिका। लिखति च भगवान तस्यामेव -

[१] एकाग्रेणैव मनसा, पत्रीलेखः सहेतुकः ।
अवधार्योऽयमखिलैः, सर्वजीवहितावहः ।।

वर्तिष्यन्ते य इत्थं हि, पुरुषा योषितस्तथा ।
ते धर्मादिचतुर्वर्गसिद्धिं, प्राप्स्यन्ति निश्चितम् ।।

औद्धवीयेषु शिक्षापत्रीः भगवदपरस्वरुपेणैव प्रख्याता, सर्वेऽपि भगवदाश्रिताः प्रतिदिनमस्याः पाठं कुर्वन्त्यनक्षरज्ञाः कुर्वन्ति पूजनमस्याः, तदपि प्रतिपादिमस्ति तस्यामेव तद्यथा-

[२] शिक्षापत्र्याः प्रतिदिनं, पाठोऽस्या मदुपाश्रितैः ।
कर्तव्योऽनक्षरज्ञैस्तु, श्रवणं कार्यमादरात् ।।

वक्तृभावे तु पूजैव, कार्याऽस्याः प्रतिवासरम् ।
मद्रूपमिति मद्वाणी, मान्येयं परमादरात् ।।

शिक्षापत्र्याः माहात्म्यं तु न कोऽपि वर्णयितुं शक्नोति यतोऽद्यावध्यवन्यामनेकेऽवताराः धर्मसंस्थापनार्थाय स्वभक्तजनपरिपालनाय च प्रादुर्भूताः परंतु न खलु केनापि स्वाश्रितेभ्यः स्वहस्तादेव लिखित्वा करुणया प्रदत्ता अत एवाद्वितीयतां भजते शिक्षापत्री, भारतीयेषु वौद्धवीयेष्वेवास्याः माहात्म्यं प्रख्यातमिति न, परंतु पाश्चात्यैरपि पण्डितेरनैकेः स्वजीवनेऽस्याः विषये शोधप्रबन्धाः विलिखिताः, युनाइटेड किंगडम (यु. के.) इत्यभिधानेन प्रसिद्धतमदेशस्य लंदननामात्मके नगरे "ओक्षफर्ड" महाविश्वविद्यालयेऽद्यावधि सर - मालकमाय भगवत्प्रदत्ता शिक्षापत्री सुरक्षिताऽस्ति साम्प्रतमप्यनेके आंग्लविद अपि तया प्रभाविता·

१ शिक्षापत्री - श्लो - ७ , २०६
२ शिक्षापत्री - श्लो - २०८, २०९

तत्पठनादिकं कुर्वन्ति, न तदाश्चर्याय। किं बहूनास्वादयतु का नाम शिक्षापत्रीति ज्ञानाय निम्नलिखितान् श्लोकान् -

विज्ञाने विलयं गते प्रसरति क्षोण्यां तमस्यान्तरे,
दिङ्मूढेषु भवाध्वगेषु परितः पीडैकशेषे विधौ ।
कारुण्यादवतीर्य मुक्तिजननीं शिक्षामदाद्यामिमां,
साक्षादक्षरदिव्यधामनिलयस्तामन्हं चिन्तये ।।

संसारकर्दमविवर्तनपङ्किलानां ,
नैर्मल्यमाकलयितुं रचितावताराम् ।
आविद्यसन्तमसनिर्हरणेसमर्था -
मादेशपत्री ! भवतीमनुचिन्तयामि ।।

नानादेशनिवासीशिष्यजनतामुद्दिश्य या विष्कृता,
साक्षादक्षरवासिना नृवषुषा नारायणेन स्वयम् ।
सा त्वं सङ्ग्रथितासि पावनि! शतानन्दर्षिणा ग्रन्थतः
शिक्षापत्रि ! भवापहन्त्रि ! भवतीमम्बान्वहं चिन्तये ।।

स्वामिनारायणस्यैतत्स्वरूपमपरं हरेः ।
शिक्षापत्र्यात्मना भूमौ, चकास्त्यखिलमङ्गलम् ।।

एतादृश्याः शिक्षापत्र्याः विषयानुक्रमणिकाधोलिखितरूपेण वर्तते।

१ - १० - मङ्गलाचरणादि - उपोद्घातः
१ - १२१ - सर्वसाधारणधर्माः
१२२ - साधारण धर्मोपसंहारः
१२३ - १३२ - सम्प्रदायस्थाचार्याणां धर्माः
१३३ - १३४ - तेषां पत्नीनां विशेषधर्माः
१३५ - १५६ - गृहस्थानां विशेषधर्माः

१५७ - १५८ - नृपाणां विशेषधर्मा:
१५९ - १६२ - सधवास्त्रीणां विशेषधर्मा:
१६३ - १७२ - विधवास्त्रीणां विशेषधर्मा:
१७३ - १७४ - उभयोरपि सामान्यधर्मा:
१७५ - १८७ - ब्रह्मचारिणां विशेषधर्मा:
१८८ - १९६ - साधूनां विशेषधर्मा:
१९७ - २०२ - उभययोरपि मिश्रितधर्मा:
२०३ - २१२ - उपसंहार: ।

ग्रन्थेऽस्मिन् समेषामाश्रितानां धर्माणां समुपदेश:, व्यवहाररीती:, जीवमायेशधर्मभक्तिज्ञानविरागादिनांलक्षणानि, उपासनप्रकार:, स्वाभिमत-विशिष्टाद्वैतप्रतिपादनं, मुक्ते: स्वरूपमित्यादिका: विविधा: विषया: मध्ये मध्ये यथा विषयान्तरो न स्यात्तथा केवलद्वादशोत्तरशतद्वयात्मिकायां शिक्षापत्र्यां संगृहिता: भगवता स्वामिनारायेणन, अत एव कथयितुं शक्यते यत् - न तत्सदृश: कोप्यन्य ग्रन्थ इति ।

## (शिक्षापत्री-भाष्यम्) अथवा अर्थदीपिका

अखण्डितार्षमर्यादकेन भगवता श्रीस्वामिनारायेणन लिखिता शिक्षापत्री:, श्रुतिस्मृतिप्रतिपादितधर्माणामेव संक्षिप्तस्वरूपमिति प्रतिपिपादयिषु: शतातन्दमुनिरेवास्या अर्थदीपिकाख्या टीका विरचितवान्, ऋते चास्या: शिक्षापत्र्या: सारगार्भितोऽभिप्रायोऽवगन्तुं न कदापि शक्यते।

यदा शिक्षापत्र्या: निबन्धनं सम्पूर्णमभवत् तद्दिनत एव (१८८५ - कार्तिक शुक्ल - २) तट्टीकाया: लेखनमारभत शतानन्दमुनि: तथा च सहोमासे पञ्चम्यां समापयच्च, तदुक्तं तत्रैव सत्संङ्गिजीवने तद्यथा -

[१] ततः स भगवत्प्रीत्यै, तस्याष्टीकां सुशोभनाम् ।
आरेभे तां सहोमासे, पञ्चम्यां च समापयत् ।।

अस्याः पठनमात्रेणैव दृष्टिगोचरं भवति शतानन्दमुनेः सार्वज्ञं वैदुष्यञ्च, टीकायामस्यामनेकशास्त्राणामुद्धरणं प्रदत्तमस्ति, नैतादृशी टीका साधारणपण्डावदिभः मानुषीबुद्ध्या लिखितुमशक्या एव, मुनिरयं भगवत्प्रसादप्राप्तसार्वज्ञ्यत्वेन सर्वशास्त्राणामनुभवः हस्तामलकवत् करोति स्म, "सुज्ञेषु किं बहूना" इत्यनुसारेण दीयतेऽत्र मयास्यां टीकायामुद्धृतान्यन्येषां शास्त्राणामुद्धरणानि (नामानि) तेन लेखकस्य टीकायाः च वैशिष्ट्यं प्रस्फुटितं भविष्यति ।

## अर्थदीपिकायां प्रमाणतयोपात्तानां श्रुतिस्मृत्यादीनां नामानि

### वेदाः

- अथर्वसंहिता
- ऋग्वेदसंहिता
- ऋग्वेदे खिलम्
- (ऋचि) बाष्कलशाखा
- ऐतरेयब्राह्मणम्
- ऐतरेयारण्यकम्
- गोपथब्राह्मणम्
- तैत्तिरीयब्राह्मणम्
- तैत्तिरीयसंहिता (कृष्णयजुर्वेदः)
- तैत्तिरीयारण्यकम्
- दैवतब्राह्मणम् (षडविंशब्राह्मणम्)
- पुरुषसूक्तम्
- पैङ्गिरहस्यम्

१ सत्सङ्गिजीवनम् प्र. ५. अ. ६७ श्लो. ३

- मैत्रायणीसंहिता
- (यजुषि) कठशाखा
- शतपथब्राह्मणम्
- शुक्लयजुर्वेदसंहिता
- सामवेदसंहिता
- (साम्नि) मैत्रायणीशाखा

## उपनिषदः

- अथर्वशिखोपनिषत्
- अथर्वशिरउपनिषत्
- अद्वयतारकोपनिषत्
- आत्मोपनिषत्
- आरुणिकोपनिषत्
- ईशावास्योपनिषत्
- ऐतरेयोपनिषत्
- कठोपनिषत्
- कैवल्योपनिषत्
- कौषितकीब्राह्मणोपनिषत्
- गर्भोपनिषत्
- गोपालपूर्वतापिन्युपनिषत्
- छान्दोग्योपनिषत्
- जाबालोपनिषत्
- तैत्तिरीयोपनिषत्
- नारायणोपनिषत्
- नारायणोपनिषत् (तैत्तिरीयारण्यके नारायणानुवाकः)

- नृसिंहोत्तरतापिन्युपनिषत्

- परमहंसोपनिषत्
- प्रश्नोपनिषत्
- बृहदारण्यकोपनिषत्
- महोपनिषत्
- माण्डूक्योपनिषत्
- मुण्डकोपनिषत्
- मैत्रायण्युपनिषत्
- वासुदेवोपनिषत्
- श्वेताश्वतरोपनिषत्
- सुबालोपनिषत्
- जैमिनीयन्यायमालाविस्तरः
- तन्त्रवार्तिकम्
- पाराशर्यविजयः
- पूर्वमीमांसासूत्रम्
- शाबरभाष्यम्
- बोधायनवृतिः
- ब्रह्मसूत्रम्
- ब्रह्मसूत्ररामानुजभाष्यम्
- ब्रह्मसूत्रशाङ्करभाष्यम्
- भामती (शाङ्करभाष्यम्)
- रामानुजगीताभाष्यम्
- शाङ्करगीताभाष्यम्
- आपस्तम्बश्रौतसूत्रम्
- कात्यायनसूत्रहरिहरभाष्यम्
- गृह्यपरिशिष्टम्
- गृह्यसङ्ग्रहः
- गोभिलसूत्रम्
- पारस्करगृह्यसूत्रम्
- भरद्वाजसूत्रम्

- योगसूत्रम्
- योगसूत्रभाष्यम् (व्यासदेवकृतम्)
- योगसूत्रभाष्यव्याख्या (वाचस्पतिमिश्रकृता)
- पञ्चशिखः
- साङ्ख्यसूत्रम्
- साङ्ख्यकारिका
- शाण्डिल्यसूत्रम्
- गौतमसूत्रभाष्यम्
- विष्णुसहस्त्रनामभाष्यम्
- विष्णुसहस्त्रनामनिरुक्तिः

## स्मृतयः

- अग्निस्मृतिः
- अङ्गिरःस्मृतिः
- अत्रिस्मृतिः
- अनन्तभट्टः
- आपस्तम्बस्मृतिः
- आश्वलायनस्मृतिः
- उशनसस्मृतिः
- कात्यायनस्मृतिः
- क्रतुः
- गोभिलस्मृतिः
- चतुर्विंशतिमतम्
- च्यवनः
- जमदग्निस्मृतिः
- जातूकर्ण्यस्मृतिः
- जाबालस्मृतिः
- दक्षस्मृतिः
- देवलस्मृतिः

- धौम्यः
- नारदस्मृतिः
- पराशरस्मृतिः
- पराशरस्मृतिः (उत्तरकाण्ड)
- पुलस्त्यस्मृतिः
- पैठीनसिस्मृतिः
- प्रचेतस्स्मृतिः
- प्रजापतिस्मृतिः
- बृहद्यमस्मृतिः
- बृहस्पतिस्मृतिः
- भृगुः
- मनुस्मृतिः
- मरीचिस्मृतिः
- मेधातिथिः
- यमस्मृतिः
- याज्ञवल्क्यस्मृतिः
- योगयाज्ञवल्क्यस्मृतिः
- लिखितस्मृतिः
- वसिष्ठस्मृतिः
- विश्वामित्रः
- विष्णुस्मृतिः
- वृद्धगर्गस्मृतिः
- वृद्धगौतमस्मृतिः
- वृद्धपराशरस्मृतिः
- वृद्धमनुः
- वृद्धयाज्ञवल्क्यः
- वृद्धवसिष्ठः
- वृद्धशातातपः
- वृद्धहारितस्मृतिः

- वृद्धात्रिस्मृतिः
- व्यासस्मृतिः
- शङ्खस्मृतिः
- शाण्डिल्यस्मृतिः
- शातातपस्मृतिः
- शौनकः
- षड्त्रिंशन्मतम्
- सत्यतपाः
- सत्यव्रतः
- संवर्तस्मृतिः
- सुमन्तुस्मृतिः
- हारीतस्मृतिः

## इतिहासपुराणानि

- महाभारतम्
- (श्रीमद्भगवद्गीता)
- (विष्णुनामसहस्त्रम्)
- (विदुरनीतिः)
- (हरिवंशः)
- वाल्मीकिरामायणम्
- इतिहाससमुच्चयः
- भारतसारसमुच्चयः
- अग्निपुराणम्
- आदित्यपुराणम्
- कालिकापुराणम्
- कूर्मपुराणम्
- गरुडमहापुराणम्
- नन्दिपुराणम्
- नारदीयपुराणम्

- नृसिंहपुराणम्
- पद्मपुराणम्
- ब्रह्मपुराणम्
- ब्रह्मवैवर्तपुराणम्
- ब्रह्माण्डपुराणम्
- भविष्योत्तरपुराणम्
- भागवतपुराणम्
- मत्स्यपुराणम्
- मार्कण्डेयपुराणम्
- लघुनारदीयपुराणम्
- लिङ्गपुराणम्
- वराहपुराणम्
- वामनपुराणम्
- वायुपुराणम्
- विष्णुधर्मः
- विष्णुधर्मोत्तरपुराणम्
- विष्णुपुराणम्
- शिवधर्मः
- शिवपुराणम्
- स्कन्दपुराणम् (वासुदेवमाहात्म्यम्)

## तन्त्रादि

- (नारदपञ्चरात्रम्)
- अगस्त्यसंहिता
- अहिर्बुध्न्यसंहिता
- ईश्वरसंहिता
- कात्यायनसंहिता
- गौतमीयतन्त्रम्
- जाबालसंहिता

- जैमिनिसंहिता
- तत्रसार:
- परमसंहिता
- पाद्मसंहिता
- पौष्करसंहिता
- बृहब्रह्मसंहिता
- भरद्वाजसंहिता
- लक्ष्मीतन्त्रसंहिता
- विष्णुतत्त्वसंहिता
- विष्वक्सेनसंहिता
- सनत्कुमारसंहिता
- ब्रह्मसंहिता
- विज्ञानोपनिषत्संहिता
- वैष्णवतन्त्रम्
- सात्त्वततन्त्रम्

## निबन्धा:

- अपरार्क:
- आगम:
- आगमप्रामाण्यम्
- आचारखण्ड:
- आचारचिन्तामणि:
- आचारतिलकम्
- आचारदीप:
- आचारमयूख:
- आचारसार:
- आचारसूत्रम्
- उपदेशशङ्कानिरास:
- उपमन्यु:

- ऊर्ध्वपुण्ड्रधारणवादः
- कपिलः
- कमलाकराह्निकम्
- कर्मतत्त्वदीपिका
- कल्पलता
- कालनिर्णयदीपिका
- कालमाधवः
- कालादर्शः
- कुल्लूकभट्टः (मनुस्मृतिव्याख्याकारः)
- कृत्यचिन्तामणिः
- कृत्यरत्नम्
- गुरुगीता
- चण्डमारुतः
- चतुःश्लोकी
- जीवन्मुक्तिविवेकः
- ज्ञानाङ्कुशः
- तत्त्वदीपनिबन्धः
- तत्त्वसागरः
- तिथितत्त्वम्
- त्रिंशच्छ्लोकी
- दानमयूखः
- दीक्षाविधिः
- धर्मप्रदीपः
- धर्मप्रवृतिः
- धर्मविवेकः
- धर्मशतकम्
- धर्मसारः
- धर्मोपदेशः
- नामकौमुदी

- (नारायण) सारसङ्ग्रहः
- निर्णयसिन्धुः
- नैष्कर्म्यसिद्धिः
- न्यायसिद्धाञ्जनम्
- पञ्चतन्त्रम्
- परमानन्दमन्दारः
- पराशरमाधवः
- पितामहः
- पुरश्चरणचन्द्रिका
- पृथ्वीचन्द्रोदयः
- प्रयोगपारिजातः
- प्रयोगरत्नम्
- प्रायश्चित्तमयूखः
- बृहदाह्निकम्
- ब्रह्मप्रोक्तम्
- ब्रह्मसिद्धान्तः
- भगवद्भास्करः
- भरतमुनिः
- भागवतसुबोधिनी
- भार्गवार्चनचन्द्रिका
- भावार्थदीपिका
- भास्कराचार्यः
- मदनपारिजातः
- मदनरत्नम्
- मल्लिनाथः
- महाभारतटीका (नीलकण्ठी)
- माधवः
- मिताक्षरा
- यतिधर्मसमुच्चयः

- रामार्चनचन्द्रिका
- लघुभागवतामृतम्
- विरिञ्चिसर्वस्वम्
- विश्वरूपः
- विश्वेश्वरपद्धतिः
- विष्णुकाण्डः
- विष्णुरहस्यम्
- वैष्वणवचिन्तामणिः
- व्यवहारमयूखः
- व्यवहारसमुच्चयः
- व्याख्यासुधा
- व्रतार्कः
- शतदूषणी
- शुद्धितत्त्वम्
- शुद्धिदीपः
- शुद्धिरत्नाकरः
- शुद्धिविवेकः
- शुद्रकमलाकरः
- श्राद्धमयूखः
- श्रीधरः
- श्रीमद्भागवतमाहात्म्यम्
- श्रीविष्णुचित्तः
- संस्कारमयूखः
- सच्चरित्ररक्षा
- सत्सङ्जीवनम्
- सदाचारचन्द्रोदयः
- सदाचारदीपः
- समयमयूखः
- सिद्धित्रयम्

- सुदर्शनसुरद्रुमः
- सेश्वरमीमांसा
- स्तोत्ररत्नम्
- स्नानदीपिका
- स्मृतिरत्नावली
- स्मृतिसागरः
- स्मृतिसारसंग्रहः
- स्मृतिसारसमुच्चयः
- स्मृत्यर्थसारः
- हरिभक्तिविलासः
- हरिभक्तिसुधोदयः
- हरिहरकारिका
- हारलता
- हेमाद्रिः

## नीतिः

- कामन्दकनीतिः
- नीतिविवेकः
- नीतिसारः
- लघुचाणक्यनीतिः
- विदुरनीतिः
- वृद्धचाणक्यनीतिः

## वैद्यकम्

- माधवनिदानम्
- वैद्यचिन्तामणिः
- सुश्रुतसंहिता

## काव्यम्

- गीतगोविन्दम्
- नैषधकाव्यम्
- बालभारतम्
- माधवकाव्यम्
- मेघदूतकाव्यम्
- रघुवंशकाव्यम्
- नृसिंहचम्पू:
- छन्द:प्रकाश:
- गणसूत्रम्
- पणिनीयसूत्रम्
- महाभाष्यम्
- सूत्रवृत्ति:
- वार्तिकम्
- कैयट:
- वामन:
- वैयाकरणभूषणसार:
- व्युत्पत्तिवाद:

## कोष:

- अनेकार्थसंग्रह:
- अमरकोष:
- क्षीरस्वामी (अमरटीकायां)
- त्रिकाण्डशेष:
- वेदनिघण्टु:
- मेदिनी
- विश्वकोष:
- वेदनिघण्टु:
- वैजयन्ती

- व्याख्यासुधा भानुजिदद्दीक्षितकृता
- शब्दार्णवः
- हारावली
- हैमः

## अभियुक्तोक्तयः

अस्याष्टीकायाः लेखनानन्तरं तस्याः बृहत्वमवधार्य संकुचितशेमुषीनामल्पज्ञानां कृतेऽन्वयदीपिकाख्या लघुटीकापि संरचिता मुनिनानेन, सारल्येन शिक्षापत्रेरर्थावगमाय।

## सत्संगिजीवनम्

एवमनेकानां सद्ग्रन्थानां वचनानि समुद्धृत्य शिक्षापत्रेः पारमार्थ्यं स्थापयित्वा पुनरतिलब्धकृपाप्रसादः स मुनिः प्रत्यक्षाच्युतचरितपरिपूर्णस्यात एव सर्वशास्त्रशिरोमणेः सत्संगिजीवन-नामकग्रन्थस्य निबंद्धनं चकार। वेदेतिहासपुराणस्मृतिसांख्ययोग-रामायणादिनां सच्छास्त्राणामयं साररूपमतिश्रेष्ठः भवभीतिनिवर्तकश्चग्रन्थः प्रतिपादयत्यात्यांतिकनिःश्रेयसहेतुभूतैकान्तिकधर्मविवरणमतिस्पष्टतया,एत स्यैव श्रवणमात्रेण सर्वशास्त्राणामतिदुर्गमं रहस्यमपि याथार्थ्येनावबुद्ध्यते।

किमधिकं, सर्वकल्याणगुणगणयुक्तेन सर्वश्रेष्ठेन मुक्तानन्दमुनिना चोक्तं माहात्म्ये यत् (हेमन्तसिंहं प्रति वक्ति शतानन्दमुनिः -)

> [१] एतन्मत्तो हरिः श्रुत्वा, स्वमुखेनेदमब्रवीत् ।
> रमणीयमिदं शास्त्रं, सर्वशास्त्रशिरोमणिः ।।
> [२] एतत्पुण्यमलं पवित्रममलं सद्धर्मशास्त्रं परम्,
> धर्मज्ञानविरागभक्तिनिभृतं सेव्यं सतां नित्यदा ।
> पापौघप्रशमं नृणां कलिमलप्रक्षालनं सर्वथा,
> जाड्यध्वान्त निवारणं सुकृतिभिः सम्प्राप्यते नेतरैः ।।

१ सत्सङ्गिजीवनम्. माहा. अ. १ श्लो. २७
२ सत्सङ्गिजीवनम् माहा. अ. १ श्लो. २९

[1] **बहुविधद्रविणेष्विव शेवधिः, क्षितिरुहेष्विव कल्पतरुर्वरः।**
**सकलगोष्विव कामदुघा वरा,श्रुतगणेषु वरिष्ठमिदं मतम्।।**

तथा च पञ्चप्रकरणात्मकोऽयं ग्रन्थः साक्षात् श्रीहरेरपरस्वरूपेणैव विराजते तद्यथा -

[2] **प्रथमादिपञ्चमान्त, पञ्चप्रकरणानि तु ।**
**आस्य - हृत् –तुङ्ग जान्वङ्घ्रिरूपाण्यङ्गानि यस्य वै ।।**

**प्रोक्तानि सन्ति दिव्यानि, श्रीहरिं करुणाम्बुधिम् ।**
**तं भक्तिधर्मतनयं, हृदये चिन्तयाम्यहम् ।।**

यथा श्रीकृष्णचन्द्रस्योपासकाः विविधमतावलम्बिनोऽपि सर्वे श्रीमद्भागवतमाद्रियन्ते तथा च श्रीरामचन्द्रस्योपासकाः विविधमतावलम्बिनोऽपि श्रीमद्रामायणमाद्रियन्ते तद्वदेव परात्परपूर्णपुरुषोत्तमश्रीस्वामिनारायणभगवतः परमोपासकाः सत्संङ्गिजीवनमाद्रियन्ते ।

ग्रन्थेऽस्मिन् पञ्चसु प्रकरणेषु समागतेष्वाध्यायानां संख्या - ३१९ एकोनविंशत्यधिकत्रिंशत्तमाः वर्तन्ते, सप्तविंशत्युत्तरषट्शतानिसप्तदशसहस्त्राः च (१७६२७) श्लोका अनुष्टुप्संख्यया विद्यन्ते, प्रतिपादितमस्ति तदपि माहात्म्ये यथा -

**पञ्चप्रकरणान्येव, सन्ति यस्य शतत्रयम् ।**
**एकोनविशंत्यधिकमध्यायाः सन्ति यस्य च ।।**

---

१ सत्सङ्गिजीवनम्. माहा. अ. १ श्लो. ३२
२ सत्सङ्गिजीवनम् माहा. अ. १ श्लो. २९, ३०

सहस्त्राणि सप्तदश श्लोकास्तु षट्शतानि च ।
अनुष्टुप्संख्यया सप्तविंशतिर्यस्य सन्ति हि ।।

आदिमध्यावसानेषु, धर्मवैराग्ययोस्तथा ।
ज्ञानभक्त्योरुपाख्यानैः, सम्भृतं यच्च सर्वथा ।।

हरिलीलाकथाव्रातामृतानन्दितसत्सुरम् ।
हरिकृष्णपरं यद् वै सत्संङ्गिजीवनं हि तत् ।।

ग्रन्थेऽस्मिन् भगवच्चरित्रैस्सह भगवत्प्राप्त्युपायभूतधर्मभक्तिज्ञान-विरागाणां तथा च तत्परिपक्वतायै शमदमादिगुणानां चान्द्रायणादिव्रतानां सम्पूर्णयोगादीनां च प्रसंगप्राप्तवर्णनं भगवानश्रीस्वामिनारायणमुखारविन्द-विनिर्गतसदुपदेश-मकरन्दरसरूपः प्रवहति। चित्तमाकर्षयति पाठकानां प्रधानतया - प्रथमप्रकरणे चतुस्त्रिंशाध्याये यद्ब्रह्माण्डस्वरूपतदुत्पत्ति-प्रकारनिरूपणम्, एकपञ्चाशे कृतं जीवेश्वरादिस्वरूपविवेचनम्, द्वितीयप्रकरणे - दशमे सर्वदोषमूलस्याधर्मसर्गस्य सर्वगुणमूलस्य धर्मस्य च विस्तरशः निरूपणम्, यच्चैकादशद्वादशत्रयोदशचतुर्दशपञ्च-दशेष्वाध्यायेषु- क्रोधकामरसास्वादस्नेहमानैरभिभूतानां वसिष्ठसौभरि-प्रभृतीनां चरितानुवर्णनं, तृतीयप्रकरणे - एकोनत्रिंशे कृतं परस्य ब्रह्मणः साकारत्वनिराकारत्वसगुणत्व - निर्गुणत्व कतृत्वाकर्तृत्वादिविरुद्धधर्म-प्रतिपादकश्रुतिस्मृतीनाममविरोधसमर्थनम्, एकोनचत्वारिंशे कृतं ब्रह्मधामवर्णनम्, षष्टितमैकषष्टितमे च कृतं यन्नारदपर्वतकयो-राख्याननिरूपणपूर्वकं मुमुक्षोः स्त्रीप्रसंगस्य परिहरणीयतानिरूपणम्, चतुर्थप्रकरणे - एकविंशे कृतं - द्वैताद्वैतश्रुतीनां तात्पर्यनिरूपणम्, तथाष्टचत्वारिंशे दिक्षाप्रकरणे कृतमात्मपरमात्मस्वरूपविवेचनम्, पञ्चम-प्रकरणे सप्तपञ्चाशे - योगस्य यमनियमाद्यष्टाङ्गता, अन्तरंगत्वबहिरंग-त्वभेदेन यमाद्यङ्गसप्तके द्वैविध्यम्, क्रमादहिंसादिलक्षणम्, तेषां प्रत्येकं फलम्, शौचादिनियमलक्षणम्, तेषां फलं च, आसनलक्षणम्, आसनभेदाः - आसनफलम्, नाडीशोधनप्रकारः, नाडीशोधनफलम्, प्राणायामलक्षणं, प्राणायामभेदादिवर्णनम्, अष्टपञ्चाशे - विविधनाद श्रवणलक्षणशून्य-प्राणायम-स्वरूपनिरूपणम्, प्रणवमहिमा, शून्यकप्राणायामसिद्धे सहज-समाधिसिद्धिः, शून्यकप्राणायमसिद्धेर्दुर्लभतादेः वर्णनम्, एकोनषष्टितमे -

योगिना निःश्वासे ज्ञातव्यस्तत्त्वभेदः, इडादिवहने कर्तव्यः कार्यभेद इत्यादिनां वर्णनम्, षष्टितमे- प्रत्याहारधारणाध्यानसमाधीनां लक्षणवर्णनम्, एकषष्टितमे - शरीरे वर्तमानानां कोशास्थिपेशीधमन्यादीनां निरूपणम् , द्विषष्टितमे- ब्रह्माण्डरचनानिरूपणम्, त्रिषष्टितमे - कारणभूतमहाभूतपञ्चकस्यकार्यभूतपिण्डब्रह्माण्डगतमहाभूतस्य च स्वरूप-विवेकः, चतुःषष्टितमे - बाह्यस्य पिण्ड-ब्रह्माण्डान्तःस्थवायोश्च स्वरूपस्वभावविवेकनिरूपणम्, पञ्चषष्टितमे - योगिना ज्ञातव्याः स्वशरीरपातकाललिङ्गविशेषादिनिरूपणमित्यादि ।

एतादृशाः ग्रन्था एव लेखकस्य परिचायकाः भवन्ति। ग्रन्थस्यास्य निबद्धनानन्तरं सम्पूर्णग्रन्थस्य सारमाकृष्य भक्तजनहिताय "सर्वमङ्गलाख्यस्तोत्रस्य" रचना कृता।

## सर्वमङ्गलस्तोत्रम्

अस्मिन् स्तोत्रे भगवतः स्वामिनारायणस्य लीलया संपृक्तान्यष्टोत्तरसहस्रनामानि विद्यन्ते, बहुविधविद्याविद्योतितान्तःकरणः सः तदनन्तरं विचारितवान् यत् - यथा कलेराक्रमणं क्षोण्यां प्रसरिष्यति तथा मनुष्याः क्षीणायुषाः क्षीणशक्तिमन्तः प्रक्षीणविचारवन्तश्च भविष्यन्ति तेषां कृते सर्वमङ्गलस्तोत्रमिदं न निःश्रेयसे त्वपितु बृहत्वायैव भविष्यति, अत एव तस्मादपि न्यूनतमं जनमङ्गलाख्यं स्तोत्रं कृतम् ।

## जनमङ्गलस्तोत्रम्

यथा दुग्धस्य सारतमत्वेन घृतस्य परिगणना क्रियते तद्वदेव दुग्धरूपात् सत्सङ्गिजीवनात् जनमङ्गलाख्यस्य घृतस्य परिगणना क्रियते, श्रीहरेरष्टोत्तरशतनामसंपृक्तस्यास्य स्तोत्रस्य माहात्म्यं न वर्णयितुं कोऽपि क्षमः, स्तोत्रमिदं सकलमनोऽभिलषितकामनाः सद्य एव संसाधयति तल्लिखितं तस्मिन्नेव-

"सद्य फलप्रदं नृणां, तस्य वक्ष्यामि सत्पतेः" ।

औद्धवीयेष्वतिप्रसिद्धतमं स्तोत्रमिदं न ददाति स्वपाठकेभ्य: कदाचिदपि नैराश्यम्, अत एवानौद्धवीया अपि स्वमनोरथसिद्ध्यर्थमस्य पाठान् कुर्वन्ति, पुण्यतमास्य फलश्रुतिरपि ज्ञातव्यास्ति, तस्मादधो दीयते -

इत्येतत् परमं स्तोत्रं, जनमङ्गल संज्ञितम् ।
य: पठेत्तेन पठितं, भवेद् वै सर्वमङ्गलम् ।।

य: पठेच्छृणुयाद् भक्त्या, त्रिकालं श्रावयेच्च वा ।
एतत्तस्य तु पापानि, नश्येयु: किल सर्वश: ।।

एतत्संसेवमानानां, पुरुषार्थ चतुष्टये ।
दुर्लभं नास्ति किमपि, हरिकृष्णप्रसादत:।।

भूतप्रेतपिशाचानां, डाकीनिब्रह्मराक्षसाम् ।
योगिनीनां तथा बालग्रहादीनामुपद्रव:।।

अभिचारोरिपुकृतो रोगश्चान्येप्युपद्रव:।
अयुतावर्तनादस्य नशत्येव न संशय: ।।

दशावृत्या प्रतिदिनमस्याभिष्टं सुखं भवेत् ।
गृहिभिस्त्यागिभिश्चापि पठनीयमिदं तत: ।।

एवंप्रकारकफलदमिदं स्तोत्रं क्षोण्यां चिन्तामणे: स्थानं बिभर्ति उत चिन्तामणिस्तु लौलिक-पदार्थानेव प्रयच्छति परंतु स्तोत्रमिदं तु पारमार्थिक-मुक्तिमिहभुक्तिं च प्रददाति, एतादृशस्तोत्रप्रदानेन, एतादृशानां ग्रन्थानां प्रदानेन वा महदुपकारोऽस्ति शतानन्दमुने: न तत् विस्मरणाय भविष्यति कदापि केनापि। मुनिरयमन्यान्यपि स्तोत्राणि भगवत्प्रसन्नतायै विलिखितवान् तेषां नामन्यधो लिखितानि सन्ति।

## अन्येषां ग्रन्थानामुद्देश:

- ❖ "श्रीधर्मदेवस्तोत्र"मष्टोत्तरशतनामात्मकम्
- ❖ "श्रीभक्तिदेवीस्तोत्र"मष्टोत्तरशतनामात्मकम्
- ❖ श्रीवासुदेवनाममाला - अष्टोत्तरशतनामावलिरूपा

तथा च "औद्धव सिद्धान्तः" "श्रीहरिजयन्तीव्रतविधि"इत्युभयोरपि ग्रन्थयोः प्रणयनं चकार शतानन्दमुनिः। एवमयमेवोद्धवे सम्प्रदाये निबन्धकारणां प्रथमो बभूव । मुनेरस्य तिरोधानविषये न निश्चिततमोल्लेखः प्राप्यते, तदधुना तेषां पावनचरणकमले वन्दनं विधाय हरिवाक्यसुधासिन्धोः विषयमवलम्ब्य गमिष्याम्यहमग्रे ।

# "श्रीहरिवाक्यसुधासिन्धोः परिचयः"

## प्रबन्धप्रादुर्भावः

**परब्रह्मब्रह्माक्षर – वसति - मुक्तेश - प्रकृतिः,**
**प्रतन्वाविर्भावात्मरचितसमष्टीति विषयः ।**
**प्रवर्ण्यन्ते मोक्षप्रदकरणयावत् सुविधयः,**
**सुधासिन्धुग्रन्थो जयति हरिवाग्दर्शनतनुः ॥**

अथाष्टादशशताब्देः सामाजिकचित्रणमतीव दुःखाकरमासीत्, सर्वत्र प्रसृतकलेः कलुषितवातावरणेन सर्वेऽपि जनाः महापापोपपापेषु प्रसक्ताः विषयेष्वतिलुब्धाः सदाचारविवर्जिताश्चासन्, नृपाः धर्मगुरवश्चापि दुर्वासनावासितान्तःकरणा अत एवाधर्मेष्वेव धर्मबुद्धिं कारयित्वा जनानां तनधनयोः शोषणं निःशंकतया कुर्वन्ति स्म, चौर्यस्तेयव्यभिचारादिकं तु सामान्यमभवत्तदा, स्त्रीधनेष्वेवासक्तचित्ताः सर्वे तत्प्राप्तये किं किं न करोति स्म? तदानीं -

[1] "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।।

इति श्रीमद्भगवद्गीतायाः वचनानुसारेण सतां संक्षरणायासतां विनाशाय भगवतः श्रीस्वामिनारायणस्य प्रादुर्भावो बभूव । सर्वज्ञोऽयं श्रीहरिः विचारितवान् यत्, किं वा फलमधार्मिकाणां नाशेन ? येन जायते मनसि दुराचारप्रवृत्तिः तस्यैवाज्ञानरूपाधर्मस्य विनाशनेनैव सर्वे सुखिनः भविष्यन्ति । कथं वै भवत्यज्ञाननिवृत्तिरिति जिज्ञासायां श्रीमद् भगवद्गीतायाः [2] "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" [3] "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन", [4] "सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यति" इत्यादिकाःश्लोकाः सुस्पष्टरूपेण प्रतिपादयन्ति यत् ज्ञानं विनाज्ञानस्यनिवृत्तिरसंभवेति । ज्ञानं चासकृदुपदेशदानेनैव जायते, अत एव भगवता विनिश्चितं यत् कलिबलखण्डनाय धर्मभक्त्योरभिवृद्धये च ज्ञानवितरणमेव श्रेष्ठोपाय अत एवाखिलहेयप्रत्यनीककल्याणैकतानः स्वेतरसमस्तवस्तुविलक्षणः ज्ञानानन्दैकस्वरूपः सर्वेश्वरोऽपारकरुणा-निधिराश्रित-वात्सल्यविवशः कलिकलुषितचेतनोद्दिधीर्षया स्वयमुर्व्या-मवतीर्णः पारमैकान्तिक-धर्मपरायणैः परमहंसैः परिवृतचरणकमलः प्रश्नप्रतिवचनरूपैः मधुरैर्मधुरैरूपदेशैः स्वाश्रितानानन्दयन् जगति प्रावर्तयदैकान्तिकं धर्मम् । ग्रामाद्ग्रामं नगरान्नगरं परिभ्रमन्भगवान्यदुपदेश चकार तस्य लेखनेन द्वारा संग्रहं कृतवान कतिपय ब्रह्मविदामग्रेसराः विद्वत्प्रवराश्च साधवः, अनन्तरं भगवता स्वयमेव तेषु संग्रहितोपदेशेषु जीवात्यान्तिककल्याणं सरलतया प्रतिपादनतत्परैकलक्ष्माण्युपदेशवचनानि विभज्य कारितः "वचनामृत" नामकः गुर्जरभाषायां निबद्धः सद्ग्रन्थः। तस्यैवानुवादरूपोऽयं हरिवाक्यसुधासिन्धुः । ग्रन्थोऽयं भगवता स्वयमेव संशोधित अत एव कथयितुं शक्यते यत् - श्रीपुरुषोत्तमा-

---

१ श्रीमद्भगवद्गीता - अ. ४ श्लो. ७, ८
२ श्रीमद्भगवद्गीता - अ. ४ श्लो. ३८
३ श्रीमद्भगवद्गीता - अ. ४ श्लो. ३७
४ श्रीमद्भगवद्गीता - अ. ४ श्लो. ३६

क्षरातीतमुखोद्‌भूतोऽपवर्गफलदः समस्तसाधनसंकलनसमुपबृंहितः शाश्वतिक-तृप्तिप्रदानकरः यावद्विधब्रह्मात्मविद्यासंभृतः सार्वभौमसम्राडिव भृशतमं विजयते।

## श्रीहरिवाक्यसुधासिन्धोः सम्पादकाः

सर्वप्रथमं तावत्यदुपदेशः भगवता कृतः तस्य संग्रहः कैः मुनिभिः कृत इत्यत्र द्वौ पक्षौ विद्येते। श्रीउद्धवसम्प्रदाये स्वयं भगवता स्वस्थानेऽयोध्याप्रसादरघुवीराख्ययोः द्वयोराचार्ययोः स्थापना धर्मभक्तिज्ञान-वैराग्यादिसमस्तसद्‌गुणसम्पृक्तस्वकृतमर्यादायाः संरक्षणाय कृता, दक्षिणोत्तर-देशभेदेनाभिहिता च तेषां स्थानमर्यादा., तत्र दक्षिणदेशीयाः श्रीवृत्तालयस्थलक्ष्मीनारायणदेवपीठाधिपतिं मन्यमानाः सर्वेऽपि ग्रन्थस्यास्य सम्पादने चतुर्णामेव मुनिनां ग्रहणं कुर्वन्ति, ते च सन्ति स. मुक्तानंदस्वामी, स. गोपालानन्द स्वामी, स. नित्यानन्द स्वामी, स. शुकानन्द स्वामी च । उत्तरदेशीयाः श्रीकर्णावतिस्थितश्रीनरनारायणदेवपीठाधिपतिं मन्यमानाः प्रतिपादयन्ति यत् पञ्चमुनिभिः सम्मिलित्वा सम्पादितोऽयं प्रबन्ध इति, ते सम्पादकेषु स. ब्रह्मानन्दस्वामिनमपि स्वीकुर्वन्ति, विदुषमाग्रेसराः श्रीकृष्णवल्लभाचार्यास्तु प्रतिपादयंति यत् सद्‌गुरुभिः संकलितवचनामृतस्यानुवादानन्तरमपि तैः सद्‌गुरुभिः गीर्वाणविद्‌भिः सुधासिन्धोः संशोधनमपि कृतमस्ति, ते लिखन्ति -

[१]"दार्शनिकाऽगणिताऽमानुषीमतिजनितकार्यकारणभावादिसंसिद्धतर्क श्रुतिस्मृतिसूत्रादिप्रसाधिततत्वावगाहिशेमुषीसम्पन्नाविद्वद्धुरंधराग्रपदभाजस्तदानीन्तना एव श्रीस्वामिनारायणभगवच्छिष्याःब्रह्मात्मविद्यादिपारंगताः श्रीमुक्तानंदमुनि, श्रीगोपालानन्दमुनि, श्रीब्रह्मानन्दमुनि, श्रीनित्यानन्दमुनि, श्रीशुकानन्दमुनि नामानः पञ्च सद्‌गुरवः नैष्ठिकव्रतिनः सुधासिन्धुप्रबन्धं प्रायशोऽष्टसहस्त्राधिश्लोकात्मकं सर्वथा यावद् विषयप्रमाणिकमपि भगवदाज्ञयाऽऽलोचनपूर्वकमपिप्रामाणिकत्वे स्वस्वहस्ताक्षरप्रदर्शित-प्रशस्तिकं व्यधुः"

---

१ सुधासिन्धुसारसन्दोहनम् - पृष्ठ - १

श्रीमत्कृष्णवल्लभाचायार्णां मतेऽपि सम्पादकेषु स. ब्रह्मानन्दस्वामिनः स्थानं वर्तत एव, तथापि साम्प्रतकालेऽनेके जनाः (अधिकतमा इत्यर्थः) चत्वार एव मुनयः वचनामृतस्य सम्पादकाः सन्ति इति प्रतिपादयन्ति, ते कथयन्ति -वचनामृतस्यान्ते त एव सद्गुरवः अष्टादशश्लोकैः वचनामृतस्य परिचयं दत्तवन्तः, तेषु एव श्लोकेषु -

"मुक्तानन्दश्च गोपालानन्दो - मुनिरुदारधीः ।
नित्यानन्दशुकानन्दौ चत्वारो मुनयस्तु ये ।।

एतैः संगत्य लिखितानीत्थं धर्मजनेर्हरेः ।
वचोऽमृतानि सर्वाणि यथामति यथाश्रुतम् ।।

इत्येवं प्रकारेण चत्वार एव सद्गुरवः वचनामृस्य सम्पादकाः सन्तीति प्रतिपादितमस्ति, तदा उत्तरदेशीयाः कथयन्ति यत् वचनामृतस्यान्ते तु एकोनविंशतिः - श्लोकास्सन्ति तेषु एव श्लोकेषु -

मुक्तानन्दश्च गोपालानन्दोमुनिरुदारधीः ।
ब्रहमानन्दमुनिर्नित्यानंद शुकमुनिस्तथा ।।
तैः पञ्चभिः सुसंगत्य, श्रीहर्य्युक्तिः सुधोदधिः ।
लिखितश्शोधितश्चापि, यथाबुद्धियथाश्रुतम् ।।

इति श्लोकानुसारेण स.ब्रह्मानन्स्वामिनोऽपि सम्पादकमण्डले नामाभिधानमस्त्येव। अत्र ज्ञातव्यमास्ते यत् - हरिवाक्यसुधासिन्धोः साक्षाल्लेखकः शतानन्दमुनिः लिखति स्वयमन्ते-

[१] मुक्तानन्दश्च गोपालनन्दः सर्वसदग्रणीः ।
नित्यानन्दः शास्त्रिवरो, ब्रह्मानंदो महाकविः ।।

पञ्चमश्च शुकानन्द, एतैः संगत्य तत्वतः ।
संस्मृत्यैतानि लिखितान्यभवत् दुर्गपत्तने ।।

स्वयं लेखकस्य मतेऽपि ब्रह्मानन्दस्वामी सम्पादकमण्डलेऽस्ति तथापि देशविभागादेव चेद्दुराग्रहो भवेत् तर्हि तन्नोचितम्, ब्रह्मानन्दस्वामी अपि विदुषामग्रेसरः ब्रह्मनिष्ठः कविवरश्चासीत्, तथा च श्रीभगवतः स्वामिनारायणस्यात्यन्तकृपावलम्बित्वेन प्रसिद्धस्यास्य जीवने कुत्रापि कलिकल्मषकलंकस्य नाणुमात्रमपि दर्शनं भवति, लिखिताश्च मुनिनानेनानेके सद्ग्रन्थाः संकीर्तनाश्च, अत एव स. ब्रह्मानंदस्वामिनोऽपि सम्पादकमण्डले नामाऽस्त्येव।

## सुधासिन्धोः लेखकः

पाषण्डोच्छेदनपटोः उद्धवाध्वप्रवर्तकस्य च भगवतः स्वामिनारायणस्य वचनामृतस्य सम्पादने चत्वारः मुनयः आसन् वा पञ्च इति विषये तु वैमत्यं वर्तते परंतु हरिवाक्यसुधासिन्धोः लेखकोऽस्ति शतानन्दमुनिरिति विषये तु न केषाञ्चिदपि विमतिः , वर्णितं च सत्संगिजीवने –

[२] सभाकृतास्तत्रतत्र, हरेर्वातासुधास्ततः ।
मुक्तानन्दादिभिः सद्भिः, संश्रुता सर्वशश्च या ।।

तासां तैर्लिखिताः स्मृत्वा तास्तुसत्संगिनां मुदे ।
शतद्वयेन प्रमिता द्विषष्ट्या संयुतेन वै ।।

---

१ श्रीहरिवाक्यसुधासिन्धु - पृष्ठ - ३०१

२ सत्संगिजीवनम् - प्रकरण - ५ अ. ६८ श्लो. ८०-८३

तासां ग्रन्थकृतेराज्ञा पद्यैरम्यैस्तु या कृता ।
पूर्वं श्रीहरिणा तां स स्मृत्वैकं ग्रन्थमातनोत् ।।

धर्मज्ञानविरागाणां , सम्यग्रूपप्रकाशकम् ।
हरिवाक्यसुधासिन्धुं, कृष्णभक्तेश्च तत्वतः ।।

तथा च ग्रन्थास्यान्ते लिखति स्वयं शतानन्दमुनिः -

[1] द्वे शते द्वयधिकाषष्टिरित्येतानि हरेर्मया ।
वचोऽमृतानि संत्यद्यैर्ग्रथितानि विभागशः ।।

एभिश्श्लोकैः प्रमाणितो भवति यत् हरिवाक्यसुधासिन्धोः लेखकः शतानन्दमुनिरेवास्ति, विषयमिदमवलम्ब्य पण्डिताग्रगण्यः श्वेतायनव्यासो श्रीमत्कृष्णवल्लभाचार्यः "श्रीसुधासिन्धोःसारसन्दोहनमि"त्यात्मके स्वनिबन्धे लिखति यत् -

"प्रकृष्टप्रबन्धोऽयं विक्रमादित्यस्याऽष्टादशशताधिकषट्सप्ततितम संवत्सरत आरभ्याऽष्टादशशताधिकषडशीति संवत्सरपर्यन्तं समयमधिकृत्य तन्मध्यकालिकं भगवत्तदाश्रितभक्तजनप्रश्नोत्तरात्मकः सुस्वरूपमाससाद । गुर्जरभाषात्मकवचनामृतनामकमेनं प्रबन्धं विद् वद्धुरन्धरः श्रीस्वामिनारायणभगवच्चरणाश्रयकृतनिवासः समाधिसिद्धिसम्पन्नः हिमालयादिप्रदेशेष्वपि व्योममार्गेण विचरन्नर्तधानमूर्तिः सर्वविद्यासुसर्वज्ञकल्पः श्रीशतानन्दमुनिः सन्निर्दिष्ट समये एव संस्कृतभाषायां काव्यात्मकं सुधासिन्धुनामानं द्विषष्टयधिकद्विशततरंगात्मकं जग्रन्थ इति" ।

केषाञ्चिद् विदुषां मते भगवता यदुपदिष्टं तदेव साक्षात्तया स्वमनसि निधाय शतानन्दमुनिः "श्रीहरिवाक्यसुधासिन्धोः" रचना चकार इति, परंतु सुधासिन्धोः दर्शनमात्रेणाथवा वचनामृतमधीत्य सुधासुन्धो अध्ययनात् एवमेव प्रतीयते यत् वचनामृतस्यैवानुवादरूपः सुधासिन्धुः। केचिदर्धज्ञानविदग्धाः पठितमूर्खाः सुधासिन्धावुपरिलिखितस्वनिबन्धेषु

[1] श्रीहरिवाक्यसुधासिन्धु - पृष्ठ - ३०१

प्रतिपादयन्ति यत् - मैथिलत्वात् गुर्जरभाषायाः ज्ञानं नासीच्छतानन्दमुनेः तस्मादेव कारणात् संस्कृते पृथक्तया सुधासिन्धोः निबन्धनं चकारेति, परंत्वज्ञास्ते न विचारयन्ति यत् भगवता श्रीस्वामिनारायणेन कस्यां भाषायामुपदेशः कृतः । सामान्यतमा वार्ता यत्- यस्मिन् प्रान्ते यां भाषां जनाः विदन्ति उत यया जनाः व्यवह्रियन्ते सा एव भाषा तेषामुपदेशकरणे योग्या, नो चेत् भाषाज्ञानविरहात् उपदेशकरणस्यैव वैयर्थ्यात्, अत एव भगवता गौर्जराणामग्रे गुर्जरभाषायामेवोपदेशः कृतमिति तु प्रसिद्धमेव, अत्रेदं चिन्त्यम् - संगृहीतवचनामृतानां पठनेऽवबोधने वासमर्थो शतानन्दमुनिः कथमवबोधयामास भगवत्प्रोक्तां गुर्जरभाषामिति, तथा च वचनामृते यानि वाक्यानि संग्रहितानि तस्यैवानुवादरूपः सुधासिन्धुः न कुत्रापि वचनामृतमुल्लङ्घ्य नवीनां वार्तां प्रकटयति तेनैव सिद्धयति यत् वचनामृतस्यानुवाद एव सुधासिन्धुरिति तथा चोक्तं सत्संगिजीवने शतानन्दमुनये-

[१] **भूतं भवद्भविष्यं यत्तज्ज्ञानं प्रददौ प्रभुः ।**
**ततोऽभूत् सोऽपि सर्वज्ञः शतानन्दो महामतिः ।।**

भगवत्कृपया यः सर्वज्ञतां प्राप्तवानासीत् तस्य कृते का नाम गुर्जरभाषा? अत एव नाद्रियामहे वार्तामेतामसत्याम्। भगवदाज्ञया प्रचोदितः शतानन्दमुनिः ग्रन्थस्यास्य प्रणयनं चकार इत्येव सुवचम् यतः प्रतिपादितं तदपि सत्संगिजीवने-

[२] **तासां ग्रन्थकृतेराज्ञा, पद्यैरम्यैस्तु या कृता ।**
**पूर्वा श्रीहरिणा तां स स्मृत्वैकं ग्रन्थमातनोत् ।।**

एवं प्रकारेण सिद्धयति यत् सर्वज्ञो शतानन्दमुनिः , स. मुक्तानन्दस्वामी स. गोपालानन्दस्वामी - स. नित्यानन्दस्वामी - स. शुकानन्दस्वामी स. ब्रह्मानन्दस्वामिभिः सम्पादिस्य श्रीहरिणा च स्वयमेव

१ सत्संगिजीवनम् - प्र. प्र. अ. ३ श्लो. ८०-८१
२ सत्संगिजीवनम् - प्र. प्र. अ. ६८ श्लो. ८२

संशोधितस्य वचनामृतनामकग्रन्थस्यानुवादरूप"श्रीहरिवाक्यसुधासिन्धोः" निबन्धनं चकारेति ।

## ग्रन्थास्यास्य प्रकरणानि तरंगाश्च

श्रीमद्भगवता प्रोक्तस्यास्य ग्रन्थस्य सन्ति नवप्रकरणानि। भगवता श्रीस्वामिनारायणेन सर्वजीवहितायानेकेषु ग्रामेषु नगरेषु विचरणं कृतम्, तत्र तत्र गत्वा तेषां तेषां हरिभक्ताना सविधे सधर्मभक्तिज्ञानवैराग्यपरिपूर्णमुपदेशं चकार प्रतिदिनम् , कस्मिन् दिने, कस्मिन् ग्रामे कस्य गृहे वा भगवता एषा वार्ता कृता साऽपि मुनयः संगृहितवन्तः, तेषु कृतसंग्रहेषु , भगवान् स्वयमादिनारायणः स्वामिनारायणः येषां ग्रामाणां यानि वचोऽमृतानि स्वप्रसन्नतार्पूकमचिनोत्, यानि च वचोऽमृतानि सम्प्रदाये प्रमाणभूतानि तदनुसारेण सन्ति हरिवाक्यसुधासिन्धौ नवप्रकारणानि, तेषां नामानि तथा च तेषां कति तरंगास्सन्ति तस्य विवरणमधो दीयते, तत्पूर्वं ज्ञातव्यमास्ते यत् - सुधासिन्धु इत्यभिधानात् तस्मिन् विश्राम वाध्यायादिनामापेक्षया तरंग-शब्दस्य सुष्ठु प्रयोगः कृतवानस्ति शतानन्दमुनिः

| | | |
|---|---|---|
| १ - दुर्गपत्तनीयप्रथमप्रकरणस्य | - | अष्टसप्ततितरंगाः = ७८ |
| २ - सारंगपुरस्य | - | अष्टादशतरंगाः = १८ |
| ३ - कार्यायनग्रामस्य | - | द्वादशतरंगाः = १२ |
| ४ - लोहग्रामस्य | - | अष्टादशतरंगाः = १८ |
| ५ - पञ्चालाग्रामस्य | - | सप्ततरंगाः = ७ |
| ६ - दुर्गपत्तनीयमध्यप्रकरणस्य | - | सप्तषष्टितरंगाः = ६७ |
| ७ - वृत्तालयस्य | - | विंशतितरंगाः = २० |
| ८ - श्रीनगरस्य | - | त्रयतरंगाः = ३ |
| ९ - दुर्गपत्तनीयान्त्यप्रकरणस्य | - | एकोनचत्वारिंशत्तरंगाः = ३९ |

सर्वेषु प्रकरणेषु स्थितानां तरंगाणां संख्या द्विशताधिकद्विषष्टि (२६२) एव, अत्रोत्तरदेशीयाः न सम्मताः, किञ्चित्कालपूर्वमेवाहमदावाद-कालुपुर श्रीस्वामिनारायण-मन्दिरतः प्रथमवारं (उत्तरदेशीयानां कृते) हरिवाक्यसुधासिन्धोः प्रकाशनं सञ्जातमस्ति, भुजनगरस्थितं - श्रीस्वामिनारायणमन्दिरतोऽपि साम्प्रतं पत्राकाररूपेण हरिवाक्य-सुधासिन्धोः प्रकाशनं सञ्जातम्, परंतु द्वयोरपि

पुस्तकयोः प्रामाणिकतायाः विषये प्रबुद्धजनानां विदुषां च वैमत्यं वर्तते। उत्तरदेशीयानां कृते श्रीनगरस्य त्रय एव तरंगा इति वार्तातीवदुःखकरा आसीत् तथा च दुर्गपत्तनसारंगपुरकार्यायनलोहपञ्चालावृत्तालयादिकानि ग्रामाणि यानि यानि भगवताप्रोक्तवचनामृते प्रकरणरूपेणसंस्थितानि तानि सर्वाणि दक्षिणदेशीयानि सन्ति, अत एव तैः स्वमत्या निश्चयं कृत्वा स्वदेशमाहात्म्यवृद्ध्यै अश्लालिजेतलपुराख्ययोः साम्प्रतंप्रसिद्धयोः ग्रामयोः वचोऽमृतानि, तथा च श्रीनगरस्य वचोऽमृतानि भगवत्तिरोधानान्तरं वर्धितानि, तेषामेवानुवादरूपेण हरिवाक्यसुधासिन्धावपि तरंगाणां वृद्धिर्कृता। कार्यमेतत् केषाञ्चिन्मते समीचीनं, केषाञ्चिन्मतेसमीचीनतमं, केषाञ्चिन्मतेऽसमीनञ्चेति । तेषु तरंगेषु श्रीनगरस्य अष्टौ, अश्लालिग्रामस्य - एकः, जेतलपुराख्यग्रामस्य पञ्चेति । नाद्रियामहे वयं सक्लेशयुक्त्वादेतेषां तरंगाणां चर्चा ।

प्रश्नप्रतिवचनरूपेऽस्मिन् ग्रन्थे दुर्गपत्तनीयप्रथमप्रकरणस्याष्ट-सप्ततितरंगेषु द्विसहस्त्राधिकषट्षष्टि .. (२०६६) श्लोकाः, सारंगपुर-स्याष्टादशस्तरंगेषुषट्शताधिकपञ्चपञ्चाशत्त . (६५५) श्लोकाः, कार्यायनग्रामस्य द्वादशतरंगेषु त्रिशताधिकद्विपञ्चाशत् (३५२) श्लोकाः, लोहग्रामस्याष्टादशस्तरंगेषु अष्टशताधिकाष्टत्रिंशत् (८३८) श्लोकाः, पञ्चालाग्रामस्य सप्ततरंगेषु त्रिशताधिकसप्तदश (३१७) श्लोकाः, दुर्गपत्तनीयमध्यप्रकरणस्य सप्तषष्टितरंगेषु - अष्टादशशताधिक-षट्त्रिंश-त् (-१८३६) श्लोकाः, वृत्तालयस्य विंशतितरंगेषु पञ्चशताधिक-द्वाविंशत्त (५२२) श्लोकाः, श्रीनगरस्य त्रयस्तरंगेषु सप्ताशीति . (८७) श्लोकाः, दुर्गपत्तनस्यान्त्यप्रकरणस्य - एकोनचत्वारिंशतरंगेषु द्वादशशताधिकद्वाशीति (१२८२) श्लोकाश्च सन्ति, सर्वमाहृत्य चैकोनशीतिशताधिकपञ्चपञ्चाशत्तमाः (७९५५) श्लोकाः ग्रन्थेऽस्मिन् वर्तन्ते।

तथा च गन्थेऽस्मिन् केनापि पृष्टे सति यदुत्तरं दत्तं भगवता तस्यैवाथवा भगवता करुणया स्वयमेव स्वभक्तजनहिताय या वार्ता कृता तस्याः संग्रहोऽस्ति, तदस्मिन्प्रश्नप्रतिवचनरूपे दुर्गपत्तनस्यप्रथमप्रकरणस्य तरंगेषु एकशताधिकपञ्चसप्ततिः (१७५) प्रश्नाः, कार्यायनस्य तरंगेषु षट्त्रिंशत् (३६) प्रश्नाः, सारंगपत्तनस्य तरंगेषु पञ्चचत्वारिंशत् (४५) प्रश्नाः, कार्यायनस्य तरंगेषु षट्त्रिंशत् (३६) प्रश्नाः, लोहग्रामस्य तरंगेषु चतुर्नवतिः प्रश्नाः (९४), पञ्चालग्रामस्य तरंगेषु दश (१०) प्रश्नाः,

---

दुर्गपत्तनस्य मध्यप्रकरणस्य तरंगेषु - एकशताधिकषोडश (११६) प्रश्नाः , वृत्तालयस्य तरंगेषु त्रयस्त्रिंशत् (३३) प्रश्नाः, श्रीनगरस्य तरंगेषु अष्टौ (८)प्रश्नाः,दुर्गपत्तनस्यान्त्यप्रकरणस्य तरंगेषु एकशताधिकचत्वारः(१०४) प्रश्नाः , सर्वेषां समूहीकृत्य षड्शताधिकैकविंशतिः (६२१) प्रश्नाः सन्ति ।

तेषु चैकशताधिकत्रिचत्वारिंशत् (१४३) श्रीभगवतः प्रश्नाः, द्विनवतिः (९२) श्रीमुक्तानन्दस्वामिनः प्रश्नाः, एकादश (११) श्रीगोपालानन्दस्वामिनः प्रश्नाः, पञ्चविंशतिः (२५) श्री नित्यानंदस्वामिनः प्रश्नाः, एकविंशतिः (२१) श्रीशुकानंद स्वामिनः प्रश्नाः, षोडशः (१६) श्रीब्रह्मानंदस्वामिनः प्रश्नाः, शतम् (१००) अन्येषां सतां प्रश्नाः, द्वौ (२) अयोध्याप्रसादमहाराजस्य प्रश्नौ, द्वौ (२) रघुवीरप्रसादमहाराजस्य प्रश्नौ, चतुश्चत्वारिंशत् (४४) हरिभक्तानाञ्च प्रश्नाः सन्ति, तथा च एकशताधिकपञ्चषष्टिः (१६५) सुधासिन्धुतरंगेषु कृपावाक्यानि (केनप्यपृष्टे सति केवलकरुणया भगवता प्रोक्तानि) सन्ति ।

श्रीमद्रघुवीराचार्यैः कृतायां हरिवाक्यसुधासिन्धोः सेतुमालानामकव्याख्यायां विषयमिदमवलम्ब्य द्रष्टव्या अन्तिमश्लोकाः तद्यथा-

**हरिवाक्यसुधासिन्धुः सर्वग्रन्थशिरोमणिः ।**
**विराजतेऽयं सकलसच्छास्त्रोपरि सर्वथा ।।**

**सच्छास्त्राणं यथा वेदः प्रमाणमधिकं तथा ।**
**ग्रन्थोऽयं सर्वथैवास्ति, हरेरास्योद्भवत्त्वतः ।।**

**कथ्यते श्लोकसंख्यास्य, यथाग्रथितवृत्तितः ।**
**अनुष्टुपसंख्यया चेति द्विधा सम्यग्पृथक् पृथक् ।।**

**तत्रादौ दुर्गनगरतरंगाणां भवन्ति हि ।**
**सहस्त्रे द्वे अशीतिश्च श्लोकाः पंच तथोत्तमाः ।।**

**तथा सारंगनगरतरंगाणां शतानि च ।**
**श्लोकाः संत्येक पंचासन्मनोज्ञा हरिसेविनाम् ।।**

कार्यायनतरंगाणा श्लोकास्त्रीणि शतानि च ।
तथैव पंचपंचाशत्संन्ति श्रोतृमनोरमाः ।।

लोहग्रामतरंगाणां श्लोका अष्ट शतानि च ।
अष्टत्रिंशत्तथा सन्ति श्रोतृभक्तमनः प्रियाः ।।

पञ्चालस्य तरंगाणां श्लोकास्त्रीणि शतानि च ।
रमणीया भवंत्येव तथा सप्तदशात्र तु ।।

पुनर्दुर्गपुरस्यात्र तरंगाणां सहस्त्रकम् ।
एकं शतान्यष्ट सन्ति, श्लोकास्त्रिंशच्च पंच च ।।

वृत्तालयतरंगाणां श्लोकाः पंचशतानि च ।
विंशतिर्द्वौ तथा संति हरिभक्तमनः प्रियाः ।।

तथा श्रीनगरस्यात्र, तरंगाणां भवन्ति च ।
भक्ताह्लाद्कराः श्लोकाः अशीतिः सप्त वै तथा ।।

पुनश्च दुर्गनगरतरंगाणां सहस्त्रकम् ।
एकं शतानि त्रिण्येव त्रयश्श्लोका भवन्ति च ।।

समग्र संख्यया श्लोकाः, यथा ग्रथितवृत्तितः।
सप्तोनाष्टसहस्त्राणि, सन्ति भक्तप्रियाः सदा ।।

वाक्यानि श्रीहरिरुवाचेत्यत्र सप्ततिस्तथा ।
द्वे च संत्यानंददानि द्रष्टयैव हरिसेविनाम् ।।

अनुष्टुप संख्यया श्लोकाः सहस्त्राण्यष्ट सन्ति च ।
एकं शतं तथा सार्धत्रिंशद्रम्या अमुष्महि ।।

हेतुः सर्वावताराणामवतारी स्वयं प्रभुः ।
पिता श्रीसहजानन्दः सर्वोपरि विराजते ।।

"श्रीमद्रघुवीराचार्येणकृतायां सेतुमालाटीकायां हरिवाक्यसुधासिन्धोः परिचयः एवम्प्रकारेण सम्प्राप्तो भवति, परंतु संशोधनाद्धि ज्ञायते यत् न तत् सम्पूर्णत्वेन शुद्धमिति यथा सारंगपत्तनस्य तरंगेषु याः श्लोकाः सन्ति तेषां संख्या आचार्यप्रवरः १५१ इति कथयति परंतु अष्टादशतरंगाणां श्लोकसंख्या नैतावति भवितुमर्हति, वस्तुतस्तु सारंगपत्तनस्य तरंगाणां श्लोकसंख्या - ६५५ इति वर्तते । नाद्यावधि सेतुमालायाः प्रकाशनं सञ्जातं तथापि श्रीहरिप्रकाशशास्त्रिणा प्रकाशिते (मछोदरी - श्रीस्वामिनारायणमन्दिर - वाराणसीतः) श्रीहरिवाक्यसुधासिन्धावन्तेऽयं भागः प्रकाशितोऽस्ति, चेत् सेतुमालायामपि एवमेव भवेत् तर्हि तु अनृतमेवेदं न पारमार्थाय कल्पते । तथा चात्र (हरिवाक्यसुधासिन्धौ) शतानन्दमुनिना हरिभक्तजनानामानन्ददानि "श्री हरिरुवाच" इति परममधुरवाक्यानि मध्येमध्येऽमृतसन्निभानि प्रायशो द्विसप्तति लिखितानि सन्ति। केचन जनाः साम्प्रदायिका एव एतादृक्पवित्रतमे ग्रन्थे क्षेपणकार्यं कर्तुमुद्यतास्सन्ति परंतु तेषां तत् कलंकः तेषामेव मुखं ग्लापयति, कैश्चिज्जनैः कृतमपि क्षेपणकार्यं गोधूमेष्वश्मखंडवत् सर्वत्र पाठकानां समक्षं स्वस्थानं प्रकाशयति, स्वमतसमर्थनोद्देशेनापि सज्जनाः नैतद्विधे कार्ये सम्प्रवृत्ताः भवन्ति। हरिकृतविविधविचित्रसृष्टावस्यामासुरीभावापन्ना एव मूढाः एतद्विधकार्येण जनानामपकरणेन मनसि प्रसन्ना भवन्तिः । श्रीहरिणा स्वयमेव संशोधितेऽऽध्यात्मपरिपूर्णे ग्रंथेऽस्मिन् का वा न्यूनता वर्तते यस्याः परिपूरणार्थं महापापेष्वापतन्ति जनाः इति न जाने।

## श्रीहरिवाक्यसुधासिन्धोः कालवर्णनम्

पूर्वमेव प्रतिपादितं यत् अष्टादशशताब्देऽस्य ग्रन्थस्यावतरणं मुमुक्षुणां भगवत्प्राप्त्यै तदवयवभूतसद्गुणानामवाप्त्यै चाभूत्, तथाप्यधुना प्रकरणानुसारेण हरिवाक्यसुधासिन्धोः कालवर्णनं क्रियते ।

१. विक्रमार्कस्य रसाश्ववसुभूमि (१८७६) शकाब्दस्य सहसः शुक्लचतुर्थीतः नगाश्वावसुभूमि (१८७७) शकाब्दस्य शुचिशुक्लतृतीयापर्यंतः दुर्गपत्तनीयप्रथमप्रकरणस्य कालो वर्तते ।

२. विक्रमार्कस्य नगाश्ववसुभूमि (१८७७) शकाब्दस्य श्रावणासित-पञ्चमीतः नगाश्वावसुभूमि (१८७७) शकाब्दस्य भाद्रमासस्य शुक्लाष्टमीपर्यंतः सारंगपत्तनस्य कालो विद्यते ।

३. विक्रमार्कस्य नगाश्ववसुभूमि (१८७७) शकाब्दस्य भाद्रमासस्य शुक्लद्वादशीतः नगाश्वावसुभूमि (१८७७) शकाब्दस्य कार्तिकशुक्लपूर्णिमा पर्यन्तो कालः कार्यायनग्रामे कृतमुपदेशस्य विद्यते ।

४. विक्रमार्कस्य नगाश्ववंसुभूमि (१८७७) शकाब्दस्य कार्तिक-कृष्णदशमीतः नगाश्वावसुभूमि (१८७७) शकाब्दस्य पौषशुक्लप्रतिपत्पर्यन्तो कालः लोहग्रामे प्रोक्तानां वचोऽमृतानां वर्तते।

५. विक्रमार्कस्य नगाश्ववसुभूमि (१८७७) शकाब्दस्य फाल्गुन-शुक्लचतुर्थीतः नगाश्वावसुभूमि (१८७७) शकाब्दस्य फाल्गुनकृष्णैकादशी पर्यन्तो कालः पञ्चालग्रामे प्रबोधितानां वचोऽमृतानां वर्तते ।

६. विक्रमार्कस्य नगाश्ववसुभूमि (१८७७) शकाब्दस्य ज्येष्ठ-शुक्लपूर्णिमातः चंद्राष्टवसुभूमि (१८८१) शकाब्दस्य माघकृष्णतृतीयापर्यन्तो दुर्गपत्तनीयमध्यप्रकरणस्य कालो विद्यते ।

७. विक्रमार्कस्य नेत्राष्टवसुभूमि (१८८२) शकाब्दस्य ऊर्जशुक्लैकादशीतः नेत्राष्टवसुभूमि (१८८२) शकाब्दस्य माधशुक्लतृतीया-पर्यन्तो वृत्तालयग्रामे प्रोक्तानां वचोऽमृतानां कालो विद्यते ।

८. विक्रमार्कस्य नेत्राष्टवसुभूमि (१८८२) शकाब्दस्य तपः कृष्णैकादशीतः नेत्राष्टवसुभूमि (१८८८२) शकाब्दस्य तपस्यकृष्णद्वितीया पर्यन्तः कालः श्रीनगरस्य वचोऽमृतानां विद्यते ।

९. विक्रमार्कस्य नेत्राष्टवसुभूमि (१८८२) शकाब्दस्य राधकृष्णैकादशीतः रसाश्ववसुभूमि (१८८६) शकाब्दस्य शुचिकृष्णदशमीपर्यन्तं दुर्गपत्तनीयान्त्यप्रकरणस्य कालो विद्यते ।

## सुधासिन्धोः भाषा प्रामाणिकता च

ग्रन्थेऽस्मिन् सरलतमायाः तथापि मनोहारिण्याः भाषायाः प्रयोगः मुनिना "ग्रन्थोऽयं परमपुरुषार्थप्राप्तये सर्वेषां कृते भवेदित्याशयेन" कृतोऽस्ति तथा चास्मिन् दरीदृश्यते सर्वत्र सरलतयावगन्तुं योग्यं अनुष्टुप् छन्दः तस्यापि कारणमुपर्युक्तमेव, स्वपाण्डित्यप्रदर्शनेन न कस्यापि हितमिति मन्यमानाः विदुषामग्रेसराः सकलवेद विद्याविद्योतितान्तःकरणाः श्रीमच्छतानन्दस्वामिपादाः सरलभाषायाः प्रयोगेनापि विरलतमां पदवीमारुढाः इति कथने नातिशयोक्तेः कुत्रापि स्थानम् । तथा चेदमपि ज्ञातव्यमास्ते यत् - शब्दार्थदृष्ट्या तु हरिवाक्यसुधासिन्धोः सारल्यं दृश्यते परंतु भावगाम्भीर्यं तु महोदधेरप्यधिकमस्ति, एषा प्रतीतिस्तु श्वेतायनव्यासश्रीकृष्णवल्लभाचार्याणां "ब्रह्मरसायन"नामक हरिवाक्यसुधासिन्धावुपरिलिखितभाष्यदर्शनेनैव भवति, भाष्यमिदं १९८० खिष्टाब्दे वाराणस्यां चौखम्भा ओरियन्टालिया संस्थानतः प्रकाशितमस्ति। शब्दब्रह्मपरब्रह्मनिष्णातेन शतानन्दमुनिना कृतेऽस्मिन् ग्रन्थे प्रवाहरूपा भाषा न कुत्रापि पाठकं विक्षेपयति, तथा च लघुत्वबृहत्वादिदोषविरहिणि चैषा व्याकरणदृष्ट्या शुद्धतमा साहित्यदृष्ट्या परिष्कृता विविधालंकारै अत एव मनोज्ञा, वेदान्तदृष्ट्या परमपुरुषार्थप्रतिपादनैकतत्परा चाभाति । सुधासिन्धुसारसन्दोहने लिखति श्रीमत् कृष्णवल्लभाचार्याः यत् -

अथ सुधासिन्धुतरंगेषु वाक्यानि - प्रश्नवाक्यानि, शंकावाक्यानि, कृपावाक्यानि, प्रेर्यप्रेरकवाक्यानि, मौनवाक्यानि, अप्रतिभावाक्यानि, असदुत्तरवाक्यानि, निरर्थकोत्तरवाक्यानि, भ्रमितोत्तरवाक्यानि, असमाधानोत्तरवाक्यानि, निश्चितार्थवाक्यानि, यथार्थोत्तरवाक्यानि, विप्रतिपत्तिवाक्यानि, लाक्षणिकपदघटितवाक्यानि, व्यञ्जनाश्लेषाऽलंकारादिवाक्यानि, रसान्वितवाक्यानि, विविधमन्त्रनामधेयाऽर्थवाक्यानि, प्रवर्तकवाक्यानि, निवर्तकवाक्यानि, भयजनकवाक्यानि, रोचकवाक्यानि, वर्णनिरूपणस्फोटकवाक्यानि, भगवद्वाक्यानि, सभाजनवाक्यानि, संबंधकरवाक्यानि, श्रुतिस्मृतिपुराणेतिहासशास्त्रसूत्रादिप्रमाणार्थकवाक्यानि, दिनादिबोधकानि,

सभास्मारकाणि, ध्यानोपयोगीनि, वेषाभूषणादिवर्णनपराणि, समाप्तिद्योतकानि, भगवत्वनिगमनकानि, संगतिसम्बन्धकवाक्यानि, गायनकीर्तनानीत्यादीनि च संभृतानि । काव्यात्मकस्तु स्वयं सुधासिन्धुः समस्तोऽस्तीति किमु वक्तव्यं छन्दःस्विति, अथैतेषां सुधासिन्धुतरंगविविधविषयाणां सर्वथैव प्रामाणिकत्वं फलप्रमाणात् हेतुभ्यश्च यथा -

**सुधासिन्धोर्हि कृत्स्नस्य, प्रामाण्यं सर्वथाऽस्ति यत् ।**
**मोक्षात्मपुरुषार्थार्थं सर्वस्वं यत्र देशितम् ।।**

**स्वाननोद्भावितो यस्मात्, सुधासिन्धुः कृपालुना ।**
**परब्रह्मणा जीवानां मोक्षार्थं दिव्यमूर्तिना ।।**

स्वेन श्रीहरिणा दिव्यमानवरूपिणा जीवादिमोक्षार्थमुद्भावितत्वात्, दिव्यमुक्तादिभिः सह निर्णीताऽर्थप्रकाशत्त्वात्, भक्तिलभ्यमोक्षाऽनुगुण-यावत् सिद्धांतमुमुक्षुजनप्रवर्तकत्वात्, सर्वविधपुरुषार्थमर्यादास्थापकमुनि-जनादिपरिपृष्टत्वात्, चित्तैकाऽग्र्येन्द्रियाऽन्तःकरणप्राणजयादि-बहुगुणप्रति-पादत्वात्, भगवत्प्रसन्नतासाधनातिशयप्रदर्शकत्वात्, श्रीहरितदैकान्तिका-द्यात्मकविलक्षणवक्तृश्रोतृकत्वात्, निखिलवेदवेदांगसारभूतचतुःपुमर्थोत्तमोत्तममहिमसंभृत-विलक्षणप्रबन्धत्वात्, श्रीहरिनियतितप्रमाणवत्वात्, प्रत्यक्षभगवदनुशाशनात्मकत्वात्, लौकिकवैदिकभागवतसर्वविधधर्मादिमूर्ति-मज्जनज्ञानोपजीव्यत्वात्, सर्वकर्मणामाराध्यप्रत्यक्षपरदेवतायां समर्पणादेश-निरुपणत्वात्, परमपुरुषसाक्षात्कारोपायप्रदर्शकत्वात्, परमपुरुषाऽध्युषिता-ऽक्षरब्रह्मलोकस्य-परमप्राप्यत्वकथनात्, परमपुरुषसाक्षात्कारोपायप्रदर्शकत्वात्, भागवतधर्मनिष्ठ-प्रकृष्टदृढीकरणकत्वात्, स्वयंप्रत्यक्षभगवताभगवद्धर्मप्रकर्षस्याऽपिप्रज्ञापितत-त्वस्याऽवेदकत्वात्, दिव्यपरममुक्ताद्यनुष्ठीयमान-विलक्षणनिर्गुणक्रियास्थित्या-द्यावेदकत्वात्, भगवद्विहितसाधनाद्यनुष्ठा-तृणामपिभगवद्दर्शनतुल्यनिज-दर्शनफलप्रदत्वदेवर्षिप्रभृतिवंद्यत्वब्रह्मादिप्रतियोगिकमहत्तादिगुणापादकत्वादिप्रकाश कत्वात्, भागवतधर्मस्याऽऽवश्यकाऽनुष्ठेयत्वपरममोक्षप्रदत्वावर्णनवत्वात्, वेदवेदान्तादिवेद्यपरदेवतायाः सर्व-प्रकारत्वेनप्रतिपादकत्वात्, श्रीहरिसंबंधप्राप्ते-न्द्रियान्तःकरणाऽऽद्यकवक्तृ-श्रोतमथितदिव्यतत्वनिर्णयाऽऽवेदकत्वात्, नित्यसर्वज्ञ श्रीहरिसमुच्चरितप्रश्नोत्तरसिद्धान्तादिगर्भितत्वात्, ब्रह्मलोकप्राप्तिभगवच्चरण-

सान्निध्यादिवासाऽऽवेदकत्वात्, मोक्षफलप्रदसर्वोपरिपरब्रह्ममुख्यविषयकत्वाच्च प्रामाण्यं सुधासिन्धुग्रन्थस्येति ।

## सुधासिन्धोः वर्ण्यविषयाः

श्रीहरिवाक्यसुधासिन्धौ सन्त्यनेकानि रत्नानि, तानि च विजिज्ञासिव्यानि-श्रोतव्यानि-मन्तव्यानि-निदिध्यासितत्वानि स्वनिःश्रेयसे, ये येऽऽध्यात्मिकाः ग्रन्थाः सन्ति तेषां वर्ण्यविषयाः वर्णिताः पञ्चरात्रागमे ईश्वरसंहितायाम् , तद्यथा -

**प्राप्यस्य ब्रह्मणो रुपं, प्राप्तुश्चप्रत्यागत्मनः ।**
**प्रात्युपायं फलं प्राप्तेः , तथा प्राप्तिविरोधि च ॥**

**वदन्ति सकला वेदाः सेतिहासपुराणकाः ।**
**मुनयश्चमहात्मानो, वेदवेदान्तवेदिनः ॥**

भगवतास्वामिनारायणेनाऽपि कृताऽस्ति चर्चा विषयमवलम्ब्यैतेषामेव, तत्र प्राथम्येन भगवदभिमत पञ्चतत्त्वानां निरूपणं क्रियते यथोक्तं सप्तमतरंगे -

**जीवेशब्रह्मकृष्णानां, मायायाश्चापि वास्तवः ।**
**अस्त्यनादिरयं भेद, इति जानीहि निश्चितम् ॥ १७ ॥**

तथा च चतुःषष्ट्यधिकशततमतरंगे -

**जीवमायेशपुरुषकृष्णा इति च पंचकम् ।**
**अन्योन्यभिन्नं चानादि वर्तते मत औद्धवे ॥ ४५ ॥**

तथा च त्रयस्त्रिंशदधिकद्विशततमतरंगे-

**वेदादीनि मया सर्वसच्छास्त्राण्यवगाह्य यः ।**
**सिद्धांतो निश्चितस्तं त्वमव्यग्रः सन् निशामय ॥ २८ ॥**

**जीवा ईशा ब्रह्म माया परमेश्वर इत्यमी ।**
**अनादयो भवंत्येव पंच चापि न संशया: ।। २९ ।।**

उद्धवाध्वप्रवर्तक: भगवान् श्रीस्वामिनारायण: पञ्चानामपि तत्वाना भिन्नत्वमनादित्वञ्च प्रतिपादयति, जन्ममरणप्रवाहानादित्वात्, संसार प्रवाहस्यानादित्वाच्च जीवात्मा नित्य:, प्रवाहगतब्रह्माण्डानां प्रवाहस्यानादित्वे नतद्रक्षकसंहारकेश्वराणामप्यनादित्वम्, ततो ब्रह्माण्डादिकारणात्मकमायाया अप्यनादित्वम्, तस्या: सृष्टिप्रयोजकस्यब्रह्मणोऽपि तच्छरीरिण: परमात्मनोऽपि सृष्टिप्रवाहादिनिरीक्षकतयानादित्वं सेत्स्यति । अत्र जीवात्मा ब्रह्माण्डस्था ईश्वरा: = प्रधानपुरुषादिवैराजान्ता:, माया = मूलप्रकृति: सर्वतत्त्वात्मिका,ब्रह्म = साकाराक्षरधाम, निराकाराक्षरधाम,तत्रत्यदिव्यमुक्ताश्चेति त्रयम्, परब्रह्म = सर्वेषामधिपति: सर्वश्रेष्ठ: पुरुषोत्तम: । तेषु प्रथमं जीवस्य निरूपणं क्रियते ।

## जीवस्वरूपनिरुपणम्

चेतन-चित्-प्रत्यक्-आत्मेत्यादिशब्दैरुच्यमानजीवविषये श्रीहरि-वाक्यसुधासिन्धौ प्रतिपादयति भगवान्स्वामिनारायण: यत् - क्षेत्रज्ञ आत्मा हृत्पद्मे सदा वर्तते, चिद्रुपोऽतिप्रकाशवान् स जीव: विशेषसत्तया हृदये संस्थित: सन् सामान्यसत्तयाखिलेशरीरे व्याप्य तिष्ठति अत एव सर्वदेशेषु सुखं दु:खं च बुध्यते ।

[1] **विशेषसत्तया वर्तौ वर्तमानोऽपि दीपक: ।**
**सामान्यसत्तया गेहं यथा भासयतेऽखिलम् ।।**

**विशेषसत्तया तद्वत् चक्रे संस्थितोऽप्यसौ ।**
**सामान्यसत्तया जीवश्चेतयत्यखिलं वपु: ।।**

यथा तैलाधिष्ठानवर्त्तीनां संबंधमन्तरा नाग्निस्तिष्ठेत् तथा विना तच्चक्रमेकल: जीवोऽपि न स्थातुमर्हति, एवमेक्येन भासमानोऽपि वस्तुत: तद्भिन्नोऽस्त्येव, अत: देहनाशेऽपि तन्नाशो न भवति क्वचित्, यथा वर्त्या

---

१ हरिवाक्यसुधासिन्धु: त. २२७ श्लो. २२, २३

विनाशेऽपि तदैक्येन स्थितोऽनलः न नश्यति तथैव जीवोऽप्यविनाशीति, तथैतस्य जीवस्य स्थूलादिदेहेषु यत् तादात्म्यं वर्तते तदेव तस्यान्वयत्वं, स्वस्वरूपे च स्थितिः तस्य व्यतिरेकत्वमिति प्रतिपादितं भगवता सप्तमतरंगे -

[1] स्थूलादिदेहत्रितये, तादात्म्येन व्यवस्थितिः ।
जीवस्य सोऽन्वयः प्रोक्तस्तस्य येनाऽस्ति संसृतिः ॥
चिद्रूपस्वप्रकाशत्वे, अच्छेद्यत्वादि चास्य तु ।
व्यतिरेको निगदितो, यत्स्थितिर्मुक्तिरुच्यते ॥

अष्टसप्ततितमें तरंगे -

[2] अथ नारायणानंदस्तं प्रपच्छ जगद्गुरो ।
अन्वयव्यतिरेकाभ्यां जीवो देहत्रये कथम् ॥

तमुवाचहरिर्जीवः सुखं दुःखं च दैहिकम् ।
स्वस्मिन् यदा तु मन्येत तदा ज्ञेयोऽन्वयस्थितः ॥

देहेभ्यो दैहिकेभ्यश्च स्वं मन्येत यदा पृथक् ।
सच्चिद्रूपं तदा त्वेष व्यतिरेकस्थितो मतः ॥

द्वयशीतीतरंगे - देहाद्व्यतिरिक्तोऽययमात्मा इति प्रतिपादयन् वक्ति भगवान्- / ८२

[3] जडो दुःखमयः शश्वन्नश्वरश्च विकारवान् ।
मलमूत्रादि निभृतो व्याप्यो रोगाद्युपद्रुतः ॥

आद्यन्तवान्सावयवो, नैकरूपश्च मायिकः ।
दृश्यश्च भौतिकः पिंडो, देहो नात्मेति दृश्यताम् ॥

१ हरिवाक्यसुधासिन्धुः त. ७ श्लो. ८, ९
२ हरिवाक्यसुधासिन्धुः त. ७८ श्लो. ६५, ६६, ६७
३ श्रीहरिवाक्यसुधासिन्धुः - त. ८२ श्लो. १०, १, १२, १३

चिद्रुपो ज्ञानवान्नित्यो निर्विकार: सुखात्मक: ।
स्थिर: सदैकरूपश्च स्वप्रकाशोऽतिनिर्मल: ॥

असंगी व्यापको द्रष्टा, दिव्योऽच्छेद्यादिलक्षण: ।
अनंगोऽमायिकोऽमृत्युरात्मास्तीत्यवधार्यताम् ॥

सततपरिणामी-विपरिवर्तमान-उपचयापचयत्वात् हानिवृद्धिमान् विकारवान् (षड्विकारा वेदान्तोक्ता: -"अस्ति - जायते - वर्धते - विपरिणमतेऽपक्षीयते नश्यति चेति) विट्प्रस्त्रावस्नायुमज्जामेदोऽस्थिमांसप्रस्वेदविवरमलादिपूर्ण कोष्ठात्मक: देह आत्मन: भिन्न एव, आत्मन: स्वरूपं चिद्रूप: - चित् ज्ञानं चैतन्यं रूपं लक्षणं यस्य स: चिद्रूप: ज्ञानवानित्यर्थ:, अनेन संविन्मात्रमेवात्मेति प्रतिपादयतां मतनिरास:, चेत् संविदेवात्मा तर्हि स कथमनुभवति ज्ञानवानहमिति, अयमहंप्रत्ययस्तु सर्वेषु जीवेषु सर्वदा तिष्ठन्त्येव, यथा च प्रतिपादितं प्रथमस्य - ११तमे "स्वं ब्रह्मस्वरूपं मत्वा", सारंगपुरस्य ११तमे "आत्मसत्तां विन्दते", सारंगपुरस्य १२तमे - "आत्मानं ब्रह्मस्वरूपं मत्वा तत्र ब्रह्मणि परब्रह्मपुरुषोत्तमोभगवानखण्डं बिराजते" सारंगपुरस्य १४तमे- "आत्मज्ञानी", "भागवतीतनु:" प्रथमस्य २१तमे – अक्षरधाम्न्यक्षरसाधर्म्यं प्राप्ता अनन्तकोटीमुक्ता निवसन्ति ते सर्वे पुरुषोत्तमस्य दासभावेन वर्तन्ते, इत्याद्यनेकस्थलेषु अहमर्थपरो जीव इति प्रतिपादितमस्ति, न वाच्यमत्र यत् अहंप्रत्ययापन्नो जीव: देहेभ्य: व्यक्तिरिक्त: कथं न प्रतिभातीति यतो -

[१] आत्मा देहत्रयाद् भिन्न:, स्वस्वहृद्यवतिष्ठति ।
प्रकाशकत्वाच्चिद्रूपो, जीवनाज्जीव उच्चते ॥

आनखादाशिखं व्याप्त: प्रकाशयति सर्वत: ।
अध्यात्ममधिभूतं च चाधिदैवं स्वतेजसा ॥

अद्यात्ममिन्द्रियाण्याहुरधिभूतं च गोलकान् ।
अधिदैवं देवताश्च तेषामन्तर्बहिश्च तम् ॥

१ श्रीहरिवाक्यसुधासिन्धु: - त.१२३ श्लो.५-८

**देवतेन्द्रियरूपेण भोक्तृत्वं तस्य कथ्यते ।**
**स्वतो निराकृतेस्तस्य न तत्सम्भवति क्वचित् ॥**

ज्ञातृत्वधर्मयुक्तस्यास्य चेतनद्रव्यस्य "मम शरीरे पीडा" इत्यादिवाक्य परिशीलनात् भवत्यनुभवः, जीवस्य कर्तृत्वं ज्ञातृत्वं भोक्तृत्वमित्यादिकाः धर्माः सच्छास्त्रसम्मता एव, परंतु सर्वतन्त्रस्वतन्त्रपरब्रह्मप्रदत्तया शक्त्यैव जीवस्य कर्तृत्वादिकं सम्भवति नान्यथा, उपर्युक्तप्रकारेण देवतेन्द्रियरूपेण च तस्य भोक्तृत्वमस्ति निराकारत्वात् परंतु यदा जीव एतच्छरीरावसाने भगवदक्षरधामं प्रति गच्छति शुद्धोपासनयापरिशुद्धः तदात्वे तु भगवत्वकृपया स भागवतीतनुं लभते यथा चोक्तं -

[1] **तमुवाच ततः स्वामी चिन्मयं दिव्यविग्रहम् ।**
**कृष्णेच्छयैव सम्प्राप्य, यांति गोलोकधाम ते ॥**

एतेन जीवानामनैक्यं भगवद्दासत्वं, मुक्तस्वरूपत्वञ्च प्रतिपादितं भवति, जीवविषये सुधासिन्धोः सारमिदमास्ते -

" अथात्मा सच्चिदानन्दश्चेतनः स्वरूपतः, देहा जडा स्वरूपतः, स्वरूपाणि प्रत्यक्षाणि पार्थिवजलीयतैजसवायवीयगगनीयादीनि, ततो जडचेतनयोरनैक्यम-भेदाभावो भेदः स्वरूपवैलक्षण्यं - स्वयंप्रकाशोऽस्वयंप्रकाशश्चेति, ज्ञानमज्ञानं चेति, प्रकाशस्तमश्चेति, दिव्यं मायामयं चेति, शुद्धं कल्मषं चेति, नित्यमनित्यं चेति, चारु, अचारु चेति, सत्यमसत्यञ्चेति, निर्मलं समलं चेति, क्षेत्रज्ञः सञ्चालकः क्षेत्रं संचाल्यं चेति, ज्ञाता ज्ञेयं चेति, अजन्यं जन्यं चेति, स्वयं परं चेति, नियामको नियाम्यं चेति, आत्मानात्मा चेति, देही देहश्चेति, इन्द्र इन्द्रियं चेति, कर्ता - करणं चेति, एतद्रीत्या विविच्य पृथक्करणज्ञानं विवेकः, अयं जन्यते जडचैतन्यवैधर्म्यज्ञानात् जडानां परस्परं साधर्म्यं जाडयादि, चेतनानां परस्परं साधर्म्यं ज्ञानादि, उभयेषां परस्परं तु वैधर्म्यं नित्यत्वानित्यत्वादि, एवं साधर्म्यवैधर्म्यज्ञानादेर्विवेको जन्यते, साधर्म्यवैधर्म्य ज्ञानञ्च तथाविधज्ञानवद्गुरुभिर्लभ्यते !

---

१ श्रीहरिवाक्यसुधासिन्धु - त. ०१ - श्लो. १५

---

तथा च जीवपरब्रह्मयोर्मध्ये नास्त्यंशांशीभावः परब्रह्मण अच्युतत्वात् जीवाना मनादित्वाच्च यथा चोक्तं -

[१] एवं कारणरूपेण सर्वत्रापि तदन्वयात् ।
सर्वरूपः स एवेति वेदादिषु निगद्यते ॥

प्रवेश्यपात्रानुगुणं तत्रापि ज्ञेयमस्य च ।
तारतम्यं दारुयोगाद् वह्नेरखिलवस्तुनः ॥

श्रुतौ हि नित्यो नित्यानामिति तन्नित्यतोदिता ।
न त्वेवाहं जातु नासमित्यादौ च स्मृतावपि ॥

अतो नित्याश्चेतनाश्च जीवा ईशाश्च सर्वशः ।
कृष्णाद् भिन्ना भवन्ति हि,श्रीभाष्ये निर्णयः कृतः ॥

तथा च योगमार्गे निर्विघ्नतासम्पादनाय कृतमंशांशिभावखण्डनमष्टाविंशत्यधिक शततमतरंगे, यथा-

[२] अंशांशिभावज्ञानं तु दोषोऽप्यत्रेति गम्यताम् ।
अंशः कृष्णस्य पुरुषोऽन्यस्तस्येत्यादिको हि सः ॥

स न ग्राह्यो भगवतोऽच्युतत्वाच्चाक्षरत्वतः ।
अखण्डत्वान्निरंशत्वान्निर्विकारत्वतस्तथा ॥

तथा च षट्त्रिंशदधिकशततमेतरंगे -

---

१ श्रीहरिवाक्यसुधासिन्धु - त. ४१ - श्लो. १५, १६, १९, २०
२ श्रीहरिवाक्यसुधासिन्धु - त. १२८ - श्लो. ३७, ३८

[1] निर्विकारं निरंशं च ब्रह्मास्ति श्रुतिवर्णितम् ।
कथं तत् सर्वरूपं स्यात् सविकारपदार्थवत् ॥

यत्त्वस्य सर्वरूपत्वं कथितं निगमेऽस्ति् तत् ।
न विकारितया किंतु हेतोः कार्यात्मकत्वतः ॥

सर्वकारणता सर्वाधारता ब्रह्मणोऽस्ति हि ।
पृथङ्नामधेयमाधारात्तिष्ठेत् कार्यं च कारणात् ॥

एवं प्रकारेण निरंशत्वादेवानादित्वं सेत्स्यति नान्यथा। यः सादिः स सान्तो भवति इति हि नियमात् यस्योत्पत्तिरेव न भवति तस्य परिणामरहितस्य नाशो कथं भविष्यति ? तदुक्तं -

[2] पृथव्यंतस्थबीजानि, यथामेघाम्बुयोगतः ।
उद्गच्छन्ति तथा जीवा मायाया ब्रह्मयोगतः ॥

सर्वेषामुद्गमे स्थाने, तिरोभावे च सर्वथा ।
इच्छैव परमेशस्य, मुख्यो हेतुरितीयताम् ॥

नित्यसिद्धा एव जीवा मायायां सन्ति सर्वशः ।
पृथिव्यामिव बीजानि तेनोद्गच्छन्ति नूतनाः ॥

ईश्वरस्याक्षरत्वाच्च न तदंशाश्च ते मताः ।
परमेश्वर एकोऽस्ति, सर्वेषां तुं नियामकः ॥

तथाविधजीवस्य, सर्वकर्मफलप्रदातृणा ईश्वरेण प्रदत्तस्वकर्मानुरूप देहसुखदुःखादिकमनुभवतः पौनःपौन्येनोपासनविरहान्नानायोनिषु भ्रमवत अज्ञानेनार्वतज्ञानवतः मुक्तिः परात्पर परब्रह्मणः शरणागतिं स्वीकृत्य तस्यैव शुद्धोपासनया तस्यैवानुग्रहात् भवति निष्पन्नः उक्तं च -

---

१ श्रीहरिवाक्यसुधासिन्धु - त. १३६ - श्लो. ३१-३३
२ श्रीहरिवाक्यसुधासिन्धु - त. २३३ - श्लो. ३०, ३३

[१] ते यदा शरणं गत्वा, साक्षात्तं सर्वकारणम् ।
स्वधर्मज्ञानवैराग्ययुजा भक्त्या भजंति च ।।

तदैव तीर्त्वा तन्मायां ज्ञानिभक्तास्तु ते द्विज ।
समानत्वं प्रयान्त्येव नारदर्षिशुकादिभिः ।।

ब्रह्मीभूताश्च ते गत्वा देहान्ते कृष्णधाम वै ।
पार्षदत्वं भगवतो ययुः सिद्धांत एष नः ।।

जीवैः या प्राप्यते मुक्ति सा कीदृशी ? कैः कैः साधनैः सा सुलभा ? इत्यादिकाः विषयाः यथास्थानमग्रे प्रतिपादिताः भविष्यन्ति, अत्रालंजीवविषयक चर्चया ।

## ईश्वर निरूपणम्

भगवत्प्रतिपादितपञ्चतत्त्वमध्ये द्वितीयं स्थानं बिभर्ति ईश्वरः । जीवस्यैवापरभेदात्मकाः ईश्वराः ब्रह्माण्डोत्पत्तिस्थितिलयकारणभूताः सर्वज्ञाः परंतु महामायासंस्पर्शयुक्ताः महाविष्णुः - सगुणब्रह्म - मायाशबलितब्रह्म - प्रधानपति - अनिरुद्ध - प्रद्युम्न - संकर्षणादि अनेकेऽभिधानवन्तः सन्ति । प्रधानपतेराब्राह्मपर्यन्ताः जीवा उत्तरोत्तरगुणशक्त्यैश्वर्यादि सम्पन्नाः जीववदेव नित्याः अच्छेद्यादिलक्षणाश्च भवन्ति, चैतन्यस्वरूपाः तेऽनेकब्रह्माण्डत्वादसंख्याताः परस्परभिन्नाश्च, जीवेश्वरयोर्मध्ये खद्योत-तारकवत् भेदो ज्ञेयः, ईश्वराणां सत्तासामर्थिरायुज्ञानादिकं जीवापेक्षयात्यधिकं अत एव ते जीवेभ्यः भिन्नाः स्वतन्त्राः पराश्च, स्वप्रशासितब्रह्माण्डे यादृक् समये यादृश्यावश्कता भवेत् तदा त ईश्वराः तादृक्प्रकारकदेहधारणेन स्वकार्यसिद्धेः सामर्थ्यवन्तः। ईश्वराणां मध्ये वैराजस्य वार्ता हरिवाक्यसुधासिन्धौ प्रचूरत्वेन प्रतिपादिता यथा-

---

१ श्रीहरिवाक्यसुधासिन्धु - त. २३३ - श्लो. ३५,३६,३७

[१] यथा स्त्रीपुरुष द्वारा लोक उत्पद्यते सुतः ।
तथा मायाधिपस्यासौ पुरुषस्योच्यते सुतः ॥

यथाऽत्र लौकिकस्य स्तः पुरुषस्याकृतिक्रिये ।
तथैव तस्य ते ज्ञेये द्विपरार्धायुषः खलु ॥

यथा जीवात्मनोऽवस्था जाग्रतस्वप्नसुषुप्तयः ।
तथा स्थित्युत्पत्तिलयास्तस्यावस्था अपीरिता ॥

स्थूलं सूक्ष्मं कारणं च जीवस्येति वपुस्त्रयम् ।
विराट्सूत्राव्याकृताख्यं वैराजस्य वपुस्त्रयम् ॥

ईश्वराणामनेकत्वविषये प्रतिपादयति च भगवान् -

[२] असंख्याता यथा सन्ति जीवात्मानस्तथैव हि ।
वैराजा अप्यसंख्याता भवन्तीत्यवगम्यताम् ॥

ब्रह्माण्डानि हि तद्देहा तेषां संख्या न विद्यते ।
ततस्तज्जीववैराजपुंसामपि न सा मता ॥

अनेकविधसंज्ञात्मकानामिश्वराणामन्वयव्यतिरेकत्वमपि प्रतिपादितं हरिवाक्य-सुधासिन्धौ यथा - जीवस्य त्रयः देहास्सन्ति तद्वदेवेश्वराणामपि वर्तन्ते, ते विराट्, सूत्रात्मा, अव्याकृत - इति शब्देन व्यवह्रियन्ते, शरीरत्रयतादात्म्येन व्यवस्थितिरेवान्वयः, तद्व्यतिरिक्तत्वं व्यतिरेकत्वमिति यथा चोक्तं -

[३] विराडादिषु तादात्म्यं, देहेष्वीशस्य तु त्रिषु ।
लक्ष्माऽन्वयेन गदितं, तथोत्पत्यादिकर्तृता ॥

१ श्रीहरिवाक्यसुधासिन्धु - त. १६४ - श्लो. ८-११
२ श्रीहरिवाक्यसुधासिन्धु - त. १६४ - श्लो. ३६, ३७
३ श्रीहरिवाक्यसुधासिन्धु - त. ७ - श्लो १०, ११

---

अवस्थानं ब्रह्मतया मायातीतत्वमस्य च ।
लक्षणं नित्यमुक्तत्वं व्यतिरेकेण कीर्तितम् ॥

श्रीमद्भागवतादिषु पुराणेषु श्रूयते यत् - "एतन्नानावताराणां निधानं बीजमव्ययम्"। "आदौ गृहीतमवतारशतैकवीजं यन्नाभिपद्मभवानदहमाविरासम्" इत्यादिकेषु स्थलेषु प्रतिपादितमस्ति यत् -धर्मसंस्थापनार्थाय ये ये भगवदवताराः सम्भवन्ति तेषां कारणरूपः विराट् पुरुष इति, अत्रेदं ज्ञातव्यमास्ते यत् - जीवेभ्यः अधिकशक्तिवन्तः परमात्मनः शेषभूताः ईश्वरा न अवतारमूलाः परंतु परंब्रह्मः पूर्णपुरुषोत्तमः ब्रह्मान्वितमहापुरुषान्वितप्रधानपुरुषद्वारेण वैराजपुरुषान्तः करणं प्रविश्य निवसति, तदन्वितान्वितान्विताऽभेदेन परम्परया परब्रह्माभेदेनवैराजपुरुषेण जायन्तेऽवताराः तदुक्तं यथा -

[१] सर्वावतारहेतुत्वं वैराजस्यैव कीर्तितम् ।
यच्छ्रीभागवते तत्तु तदन्तर्यामिणो हरेः ॥

कृष्णः पुरुषरूपेण प्रविश्याऽस्ते तदन्तरे ।
तदभेदेनावतारास्तस्मादेव प्रकीर्तिताः ॥

नहि केवलंवैराजादवतारकथाऽस्ति सा ।
हर्यावेशं विनाऽसौ यदुत्थातुमपि नाशकत् ॥

अयंभावः - भगवतः, सा भागवतेऽवतार कथा नहि केवलवैराजादुक्तास्ति, यतो हर्यावेशं विना प्रारम्भे वैराजः सपरिकरोऽप्युत्थातुं नाऽशकत् तदपि भागवतस्य प्रथमे स्कन्धे एव - तदा परवासुदेवस्य प्रवेशो सञ्जातः तदैव सोत्थितवान्, अतोऽत्र ब्रह्माण्डेऽवताराः सर्वे परवासुदेवस्य मम बोध्याः, सोऽहं परवासुदेवो भगवान् यदा प्रतिलोमतया पृथग्भवामि तदा विराट्पुरुषोऽकिञ्चित् कर इति। न सम्भवन्ति तदा वैराजादवताराः सृष्टयोऽपि च । तस्माद् परवासुदेवावेशादेवावतारा वैराजादवतारा उच्यन्ते, क्षेत्रज्ञस्य मामाप्रवेशे तु विराट्स्वयमक्रिय एवेति ।

---

१ श्रीहरिवाक्यसुधासिन्धुः त. १६४ श्लो. २९, ३०, ३१

जीवादयं विशेषः विराट्पुरुषस्य - मायाधीश (महापुरुषः मूलपुरुषो वा) सुतत्वात् प्रलये भोगान् भुक्त्वापि पुरुषं याति, पुनश्च सर्गकालेऽसौ यत् सम्बन्धोऽस्ति मायया पुरुषेक्षणात् आविर्भवति, स्मृतौ वैराजस्यायुषः द्विपरार्द्धावधिः, सहस्त्रयुगपर्यन्तं दिनं, रात्रिरपि तावत्येव, यावद् दिनं तावत् त्रिलोक्याः स्थितिर्वर्तते, अस्यैकस्मिन्नैव दिवसे चतुर्दश चतुर्दश इन्द्राः मनवश्च भवन्ति, तद्रात्रौ त्रैलोक्यं नाशमायाति सः दैनंदिनः नैमित्तिको वा प्रलयः प्रोक्तः, द्विपरार्द्धावसाने तु चतुर्दश लोकैस्सह विराट् देहस्य नाशो भवति तथा च महदादीनि तत्वानि प्रधानपुरुषौ च प्रकृतौ (महामायायां) लयमायान्ति, अत एव प्राकृतप्रलय इत्यभिधीयते, कृष्णेच्छया च प्रकृतिर्लीयतेऽक्षरतेजसि, स आत्यांतिकाख्यः प्रलयः। (देवदैत्यमनुष्यादीनां) देहानां क्षणे क्षणे यो भवति विनाशः सः नित्याख्यः प्रलयः।

ईश्वराणामपि मुक्तिविषये विहिता चर्चा हरिवाक्यसुधासिन्धौ यथा -

[१] वैराजोऽप्येवमेवास्ति, द्विपरार्द्धावधि स्वके ।<br>
देहे बद्धो वासुदेवध्यानान्मुक्तिमुपैति च ।।

संकर्षणमुपास्तेऽसौ प्रलयेऽथ स्थितावपि ।<br>
प्रद्युम्नं च तथोत्पत्तावनिरुद्धाख्यमीश्वरम् ।।

संकर्षणादयस्तिस्त्रो, वासुदेवस्य मूर्तयः ।<br>
गुणात्मिका भवन्त्येव, त्रिवर्गफलसिद्धिदाः ।।

उत्पत्त्यादिकार्यसिद्धिस्तदुपासनाऽस्य तु ।<br>
भवत्यथो मोक्षसिद्धिर्वासुदेवैकचिन्तनात् ।।

वासुदेवोपासनं च वैराजस्य न दुष्करम् ।<br>
शुद्धांतःकरणत्वेन, तत्सानिध्यस्य संभवात् ।।

१ श्रीहरिवाक्यसुधासिन्धुः त. १६४ श्लो. २२-२७

असावपि न कुर्वीत, वासुदेवस्य सर्वथा ।
उपासनं दृढं यावत्तावन्नैव विमुच्यते ॥

अयं भावः - यदा मायागुणरहितं परवासुदेवमुपास्ते विराट्पुरुषस्तदा मायां त्यक्त्वा ब्रह्मरूपो मुक्तः स्यात्, सर्वेषामीश्वराणामेवमेव भवति मुक्तिक्रमः, जीवापेक्षया ईश्वराणामिन्द्रियान्तःकरणानां विशेषसत्त्वशुद्धिमत्तया तस्य विशेष तोऽपरवासुदेव सान्निध्यस्यसत्वात्, उपासनया च परवासुदेवस्याऽस्मदपेक्षया सान्निध्यमपि स्यादात्यान्तिकमुक्तिप्रद्म् । ततः परवासुदेवोपसनं वैराजादीश्वराणां दुष्करं नास्ति, तथाप्ययं वैराजो यावद् वासुदेवस्योपसनां सर्वथा ऐकान्तिकीं दृढां समहात्म्यज्ञानां साकारां परमां न कुर्वीत चेत् तावन्नैव विमुच्येत, तथा च उपासना मुक्तिकारणं, न तु सान्निध्यं मुक्तिकारणं, एवं उपासनावन्त ईश्वराः मुक्ताः भवन्ति, न तु देवानामिव ब्रह्माण्डीयपृथिव्यामागमनं नियतं तेषामिति।

## मायास्वरूप निरूपणम्

मूलमाया - मूलप्रकृति - त्रिगुणवती - साम्यावस्थात्मिका - परब्रह्मशरीरात्मिका – जडा – सर्वजडतत्त्वोपादानभूता - कार्यकारणात्मिका - अजा - अचित् - नित्या - अनीशा - अविद्या - भगवच्छक्ति - तमरूपा - ज्ञानशून्या - निर्विशेषा - इत्याद्यनेकनामवती माया, सर्वेषां मते तस्या अनादित्वमेव, भगवानपि तस्या अनादित्वं प्रतिपादयन् वक्ति यत् -

[१] जीव ईशा ब्रह्म माया परमेश्वर इत्यमी ।
अनादयो भवन्त्येवं पंच चापि न संशयः ॥

पृथिव्यन्तःस्थबीजानि, यथा मेघाम्बुयोगतः ।
उद्गच्छन्ति तथा जीवा मायाया ब्रह्मयोगतः ॥

नित्य सिद्धा एव जीवा मायायां सन्ति सर्वशः ॥

१ श्रीहरिवाक्यसुधासिन्धुः त २३३ श्लो. २९, ३०, ३२

अयंभावः - यथा मेघाम्बुयोगतः पृथिव्यन्तःस्थजानि दृष्टिगोचराणि भवन्ति तद्वदेव जीवा भूमिस्थानीयमायायामनादिकालतोऽवस्थिता बीजस्थानीय क्षेत्रज्ञाः, सर्गादौ परब्रह्मप्रेरीतब्रह्मदृष्टिसन्नोदितोऽक्षरमुक्तात्मकपुरुषरूपमेघाम्बुयोगात् प्रादुर्भवन्ति, अनेन परब्रह्मणः मायायाः जीवस्य चानादित्वं सिद्धयति, साऽनेकजीवप्रसवित्री माया कैर्लक्षणैर्युक्ता तन्निरूपयति भगवान् द्वादशे तरंगे यथा -

[१] नित्या च भगवच्छक्तिस्त्रिगुणा चिज्जडात्मिका ।
निर्विशेषा जीवमहत्तत्त्वादिक्षेत्रमव्यया ।।

इत्युक्ता प्रकृतिस्तस्याः साम्यस्थगुणचालनः ।

नित्या - प्रागभावध्वंसाऽप्रतियोगिमायात्वम्, भगवच्छक्तिः - सृष्ट्युपादानभगवज्जडशक्तित्वम्, त्रिगुणा - त्रिगुणात्मकत्वं सत्त्वरजस्तमः स्वभाववत्वं, सत्वं - लाघवभासनधर्मगुणत्वं, रजः - चलोत्तेजकधर्मगुणत्वं, तमः- गुरुनिरोधनधर्मगुणत्वं ,एतत्त्रिस्वभावगुणतत्त्वस्वरूपयोग्यत्वं मायात्वमिति जडा - स्वतःप्रकाशरहिता, चित्- चैतन्यरहितापि चेतनगर्भवत्वेनचिद्वति अर्थात् गर्भस्थमव्ययंतत्त्वं चित्, स्वरूपस्थं व्यक्तं तत्त्वं जाड्यं, तदुभयात्मिकाऽतोऽव्यक्ताव्यक्तस्वरूपत्वस्वरूपयोग्यत्वं वा मायात्वम्, निर्विशेषत्वं नाम - शान्तघोरमूढत्वं विशेषत्वम्, एतच्च महदादिषु विषमेषु, तद्राहत्यिं कार्यात्मकविशेषरहितत्वमित्यर्थः, तथा च जीवानामीश्वराणां महत्तत्त्वादीनां च शरीरिशरीरभावोद्भवाधारं क्षेत्रम्, आपूरकं क्षेत्रम्, विलयनक्षेत्रञ्च, अव्यक्ता - व्ययोऽवयवतोऽवयवतोंऽशतो वा न्यूनभावात्मको ह्रासः स मायायां नास्तीत्यव्यया, अर्थात् अवस्था परिवर्तनेऽपि स्वरूपतोऽपरिवर्त्या निरंशास्वरूपत्वात्, प्रलये मूलप्रकृतौ निमग्नस्याऽचित्कल्पस्य जीवस्येश्वरतत्त्वस्य च गाढान्धकारगतस्येव नामरुपाऽर्हत्वेन तम स्वरूपेति, परार्थतैकस्वभावत्वात् गुणरूपा,सा न स्वतन्त्रा परंतु परमपुरुषतन्त्रा - परमेश्वरस्य कार्योपयोग्यपृथक्सिद्धशक्तिस्वरूपा, विचित्ररचनात्मकजगद्विज्ञात्राऽधिष्ठिता अत एव जडा, शक्तिः - लीलारसभूतसर्गनिर्वहणोपकरणभूता मायेति ।

१ श्रीहरिवाक्यसुधासिन्धुः त १२ श्लो. ८, ९

अथ शक्तिशक्तिमतोरैक्येन परब्रह्मस्वरूपत्वमेव शक्तेरिति चेन्न, अविद्यया मिथ्याभूतयाऽऽविद्यकमिथ्या ब्रह्मदोष तावत् मायात्मकब्रह्मदोषतापत्तेः। प्रकृतिर्मायेयं विद्याविरोधित्वादविद्या, ज्ञानविरोधित्वादज्ञानम्, सदसदुभयविरोधित्वादनिर्वचनीयम्, ब्रह्म आवरकत्वात् आवरणं, ब्रह्मभान नाशकत्वादन्धं तमः , तेन जीवाद्युत्पत्तेस्तस्य जगत्कारणत्वम्, ब्रह्मज्ञानेन नाशाच्चाशाश्वतत्वमिति चेत् ? न, नित्यस्वप्रकाशब्रह्मणस्तद्योगाऽसंभवात्, प्राग्योगेऽतिनिमित्तत्वात् तदानीं ब्रह्मणोऽविद्याया अभावात्, आवरकत्वस्य समर्थेऽप्रसंगात् नित्यभानस्य नाशाऽभावात्, ब्रह्मात्मकात्मनो नित्यत्वेन जीवादेरमिथ्यात्वात् निरूपाख्याविद्याकल्पनायाः शून्यचित्रत्वेन सिद्ध्यभावाच्च ।

मायाविषये हरिवाक्यसुधासिन्धौ तत्रतत्रान्याऽपि चर्चा वर्तते यथाष्टोत्तशततरंगे - स्थूलसूक्ष्मकारणेत्रितयी जीवमाया, तथैव विराट् सूत्रात्माऽव्याकृतरूपा ईश्वरमाया, या तु कारणशरीररूपा जीवमाया सा तु वज्रसारस्वरूपा न केनापि प्रकारेण साधनेन वा भिद्यते सा जीवान्न विभिन्ना भवति किन्तु जीवेन लभ्यते सतां समागमो ज्ञायते च साक्षाच्छ्रीहरेः स्वरूपं सतामुपदेशैः क्रियते ध्यानं श्री हरेः स्वरूपस्य हृदि च धार्यन्ते श्रीहरेर्वचनानि, तदा तत्प्रभावतस्तत् कारणशरीरं दग्धं भवति निश्चेष्टं सुषिरवत्, यथा तिन्तिणीबीजस्य त्वक् तेन बीजेन सहातिदार्ढ्येनाऽत्यवलग्नापि त्वग्नितापसेकेन भृष्टा सति दग्धा भवति, शिथिलप्रायाऽसंश्लिष्टेव हस्तेन मर्दिता निवर्तते तस्माद् बीजात्तद्वद्भगवतो ध्यानेन भजनेन वचनधारणेन तत्कारणशरीरं दग्धं सन् चिञ्चाबीजत्वगिव पृथग्भवति तस्माज्जीवात्, एवं विना त्वन्यैः कोटिभिरुपायैस्तत्कारणशरीररूपमायायाः कदाचिदपि न निवृत्तिः यथोक्तं मूले-

**[१] वपुंषि त्रीणि जीवस्य स्थूलं सूक्ष्मं च कारणम् ।।**

**जीवस्य बन्धनान्येव तानि मायामयानि वै ।**
**तत्र कारणमेवान्त्यं लभते स्थूलसूक्ष्मताम् ।।**

**पृथक्त्वेन न तज्जीवाद् वेत्तुं शक्यं मुमुक्षुभिः ।**
**तमोमयं च दुर्भेद्यं कठिनं वज्रसारवत् ।।**

---

१ श्रीहरिवाक्यसुधासिन्धुः त १०८ श्लो. ५ - ११

यदा मुमुक्षुः सत्संगं कृत्वा साक्षात् हरिं हृदि ।
दृढं निश्चित्य रहसि प्रेम्णा ध्यायति निश्चलः ॥

हृदि तस्य च वाक्यानि धत्ते तं चानुवर्तते ।
तदा तु तत्प्रतापेन भवत्यात्मा ततः पृथक् ॥

चिंचाबीजस्य त्वग्गर्भावेकत्वेन स्थितावपि ।
अग्नितापेन भिन्नौ स्तो यथा तेन तथैव तौ ॥

नास्ति कारणमायाया जीवस्याऽस्य पृथक्स्थितौ ।
एवं विना ह्युपायोऽन्य इति जानीत निश्चितम् ।।

तथा च प्रथमस्य चतुस्त्रिंशतरंगे - यदा भगवता स्वमायया विश्वमेतत् सृष्टं तदानीं तद्वृद्ध्यै स्नेहपाशोऽपि निर्मितः, तन्निबद्धस्य नुः स्त्रियां, स्त्रियाः पुंसि पुत्रवित्तगृहादौ च, द्वयोरपि साहजिकीप्रीतिर्जायते, सा एव हेतस्वरूपा विश्ववर्द्धनि भगवतः माया इति !

तथा चोनत्रिंशदधिकशततमतरंगे-

यस्तु स्नेहोऽन्यत्र हरेः सैव मायेति बुद्ध्यताम् ॥ १८ ॥

तथा चाष्टनवत्यधिकशततमतरंगे-

प्रभोः नृणां निःश्रेयसायैव रामकृष्णादिरूपो प्रादुर्भावो भुवि जायते, मानुषाकृतेस्तस्यमायामयेऽत्र जगति रम्येऽर्थेऽन्यजीववत् मोहो नैव जायते, सोऽच्युतस्तु निजेनालौकिकेनैव प्रतापेन सर्वदा असंग एव वर्तते, तथापि स्वभक्तानां प्रसन्नतायै तदर्पितान् पञ्चानपि विषयान् सादरं भुंक्ते, समर्थेऽपि तस्मिन् केचनाज्ञाः स्वसाम्येन दोषानारोपयन्ति - अहो ! अयमीशतयालोके प्रथितोऽप्यस्मदादितः अत्यासक्तोऽस्ति, एवं वदतस्ते मूढाः स्वसमं तं विदुः -

एषैव माया विज्ञेया नृत्वं नाटयतो हरेः ।
विदुषामपि यद् बुद्धावन्यथाज्ञानसम्भवः ॥ ११ ॥

तथा च दुर्गपत्तनीयान्त्यप्रकरणस्यान्तिमे तरंगे-

मायामपास्य सततं प्रीतिर्भगवति स्थिरा ।
कार्येति सर्व शास्त्राणां सिद्धांतोऽस्ति सतां मत: ॥ ०४॥

माया तु देहेऽहंबुद्धिर्ममता दैहिकेष्विति ॥ ०५॥

तथा च दुर्गपत्तनीयप्रथमस्य प्रथमे-

यद्यदेतद्ध्यानकर्तुरंतरायकरं भवेत् ।
मायैव सा तु विज्ञेया, ययाहंममते नृणाम् ॥ १२॥

इत्यादिस्थलेषु भिन्न भिन्नतया मायास्वरूपमुक्त्वा कृष्णाश्रयबलोज्झितानां सर्वेषामपि तासु मोहनं वर्णयति द्वादशोत्तरशततमतरंगे यथा -

ऐंद्रजालिकमायायामपि मुह्यन्ति पण्डिता: ।
कथं तद्योगमायायां न मुह्येयुर्महेशितु: ॥ २३॥

धृतमानुष्यनाटने प्रत्यक्षभगवद्रूपे मायिकत्वस्य लेशोऽपि सर्वथैव नास्ति इत्येवं शुद्धस्वरूपं भगवन्तं ज्ञात्वा, चोपासति शरणागतिं स्वीकृत्य तस्य माया निवृत्तिरपि प्रतिपादिता, यथा पञ्चाधिकद्विशततमतरंगे-

नराकृति परं ब्रह्म, भवत्येतद्धि निर्गुणम् ।
इति स्यान्निश्चयो यस्य, पुंसो भगवतो दृढ: ॥ १४॥

स तु मायां तीर्ण एव, वर्तमानोऽपि तादृशे ।
देहे कृष्णस्यावबोधात्, गुणातीततया किल ॥ १५॥

तथा च द्वादशोत्तरशततमतरंगे-

कृष्णाश्रयबलास्तत्र न मुह्यन्ति सुबुद्धयः ।
विबुधा अपि मुह्यन्ति, कृष्णाश्रयबलोज्झिताः ।। २४।।

इत्येवं भगवति निर्दोषता - साकारता च ज्ञात्वोपासति तेषां मायातः मुक्तिरेव न परंतु तेषां कृते तु मायायाः सुखस्वरूपत्वमपि प्रतिपादितमष्टादशोत्तरशततमतरंगे यथा -

ज्ञेया माया द्विरूपैव सुखदा दुःखदेति च ।
सुखदा कृष्णभक्तानामन्येषां दुःखदैव सा ।। ७४।।

सौम्यरूपश्चोग्ररूपः, संयमिन्यां यथा यमः ।
पुण्यात्मनां पापिनां च, वर्ततेऽसौ तथेयताम् ।। ७५।।

देहेन्द्रियांतःकरणं, मायायाः कार्यमस्ति यत् ।
बंधकृन्नास्ति तदपि भक्तानां भक्तिपुष्टिकृत् ।। ७६।।

इत्युक्तवन्तं तं मुक्तानन्दः प्राह प्रभो यदि ।
माया त्वदाश्रितानां तु सुखदैवेति कथ्यते ।। ७७।।

तर्हि भक्ता यदा ध्यानं कुर्वन्ति विजये तव ।
मनोरूपा तदा माया संकल्पैर्दुखदा कथम् ।। ७८।।

कृष्णाश्रयो दृढो येषां, माहात्म्यज्ञानपूर्वकः ।
तेषां तु सा न संकल्पैर्दुःखदेत्यवगम्यताम् ।। ७९।।

भक्तस्याप्याश्रये यस्य, स्याच्छैथिल्यं रमापतेः ।
दुःखदा तु भवेत् तस्य, विमुखस्य विशेषतः ।। ८०।।

मायापि स्थूणाखननन्यायेन भगवद्भक्तस्य परीक्षां कृत्वा तत्सहायकतर्त्री भवतीहामुत्रचेति दिक् ।

## ब्रह्मस्वरूप निरूपणम्

श्रीउध्धवसम्प्रदाये जीवेश्वरमायाधारः सर्वेभ्यः परतमः केवलात् परब्रह्मणः न्यूनतमोऽक्षराख्यं ब्रह्माख्यं वा चतुर्थ तत्वं प्रसिद्धतमम्, इदं ब्रह्म दासत्वयुक्त नित्यपरमस्नेहैक्यसंबंधात् परब्रह्मणातिशयेन संलग्नः, परात्पर भगवान् पूर्णपुरुषोत्तमः यद्यपि सर्वेष्वपि अन्तर्यामिस्वरूपेण कारणत्वेन व्यापक एव परंतु यादृक्त्वेनाक्षरे ब्रह्मणि विद्यते न तादृक्त्वेन केष्वपि संस्थितः, भगवता श्रीस्वामिनारायणेन हरिवाक्यसुधासिन्धौ ब्रह्मविषयक प्रतिपादनमित्थंप्रकारेण कृतमस्ति ।

[१] अन्यस्तु सर्वतः पूर्णः सर्वाधारो निराश्रयः ।
वर्तते सच्चिदाकाश इति प्रोक्तश्च योगिभिः ॥

स सावरणब्रह्माण्डकोटिषु व्यापकोऽस्ति च ।
तिर्यगूर्ध्वमधो मध्ये बहिस्तासां च संश्रयः ॥

स पदार्थस्तु नास्त्येव न व्याप्तस्तेन योऽभितः ।
यत्सूक्ष्मेऽणौ च तद्भागेऽप्यस्तिसोऽन्तश्च तद्बहिः ॥

आकाशसामान्यं द्विविधम् भौतिकं चिच्चेति, तत्र पञ्चभूतान्तर्गतभूतस्वरूपं भौतिकम्, बृहन्महानिति ब्रह्माकाशं चिदाकाशं सर्वव्यापकम् केवलान्वयि सर्वाधारं प्रकाशस्वरूपं ब्रह्मधामात्मकमिति द्वितीयम्, न द्वितीयं किन्तु आद्यम् अनाद्यं तु भौतिकाकाशम्, तच्चिदाकाशापेक्षया द्वितीयम्, आकाशोऽवृत्तिपदार्थः स्वयमनाधारः, आकाशाधारमन्यत्सर्वमपि, आकाशे सर्वपदार्थजातं वर्तते, विधारणशक्तिश्चिदाकाशे तेन मुक्ताः धार्यन्ते, न तु मुक्तैर्धार्यते चिदाकाशः, तदंशो मायाकाशो मायां धारयति, आकाशस्य सर्वत्र सत्यव्यवहारस्य तु सर्वपदार्थसंसर्गानुयोगित्वमर्थः, सर्वतत्वाधारमर्थः, गुरुत्वाकर्षणमाकाशे भगवन्मूर्ति नियुक्तं, सर्वाण्याकृष्यन्ते आकाशेन, मुक्ता माया ईश्वरा जीवात्मानस्तत्त्वानि पदार्थाश्चाकृष्यन्ते चिदाकाशेन यथायथं च महदाकाशेन शुद्धसत्त्वाकाशेन भौतिकाकाशेन च, ततः सर्वाधार-आकाशः सर्वत्रान्वयि सर्वान्वितश्च, चिदाकाश एव ब्रह्म शब्देन अक्षर शब्देन भगवद्धामत्वेन वोच्यते, स एव सर्वाधारः

---

१ श्रीहरिवाक्यसुधासिन्धुः त ४६ श्लो. ७ - ९

स्वेतरस्वाश्रितसमस्ततत्त्वाकर्षणवान्, सर्वतत्त्वप्रभाऽऽपूरकः, स्वयं च निराश्रयः - स्वेतराश्रयवर्जितः, स्वेष्टस्वामीपरब्रह्मगुरुत्वलाघवाऽऽकर्षणवांश्च स्वोपादानभूत श्रीपरब्रह्मपरमात्मश्रीहरिमूर्त्याश्रयमात्रस्तदन्याऽनाश्रय एवात्माधारः सन् वर्तते, स महान्, बृहद् , ब्रह्मेति, धामेति अक्षरेति, ब्रह्मलोकेति चिदाकाशेति,चेतनाकाशेति, भगवत्प्रत्यक्षदर्शिभिर्भगवत्सेवापरायणैरनादिनित्यसिद्धदिव्यसाकारमुक्तै र्भगवत्सा-र्वदिकयोगवद्भिर्ब्रह्मलोकस्थैरत्रागतैस्तैः वर्णितः, "ब्रह्मणा चिदाकाशेनेमेलोका ओताश्चप्रोताश्चे"त्यादिभिः। यः पदार्थः तेन चिदाकाशेनाभितो न व्याप्तस्तादृशः पदार्थस्तु नास्त्येव ,भगवन्मूर्तिरपि चिदाकाशं स्वस्थितस्वस्यरूपात् समन्ततो निःशेषतया प्रसारयति, यस्माद्धेतोः स चिदाकाशः सूक्ष्मेऽणौद्वयणुके तद्भागे चावयवे परमाणावपि तदात्मकोऽन्तर्बहश्चोतप्रोतो वर्तते, चिदवकाशस्यै-करसचैतन्यप्रकाशात्मकधामस्वरूपस्य द्वौ भेदौ प्रतिपादितौ -

[१] आद्यं तत्रास्त्यमूर्तं तु, धामतेजोमयं तथा ।<br>
मूर्तं पुरुषरूपं च, सर्वाधारं द्वितीयकम् ॥

आद्यं निर्गुणमित्युक्तं सगुणं च तथेतरत् ।<br>
अनिर्देश्यमिति प्रोक्तं द्वेधा शक्तियुतं तु तत् ॥

तत्राद्यं यदमूर्तं सूक्ष्मं व्यापकरसचैतन्यप्रकाशतत्वात्मकं स्वरूपत्वान्निरवयवं निरवयवगगनवन्निरवययं चिदाकाशं धाम तेजः प्रकाशस्वरूपमनन्तकोटिमुक्तानां भवनत्वादाधारत्वाद्धामरूपं, असंख्यसृष्टिस्वरूपभवनानामुड्डयनाधारत्वात् धामरूपम्। अपरिमितानां ब्रह्माण्डानामाकर्षणविधारणदिव्यस्वरूपत्वाच्च धामेति । द्वितीयम्-सेवकस्वरूपेनाभिमततेजःप्रकाशापेक्षया द्वितीयमिति, तस्य चिदाकाशस्याक्षरस्य वा द्वितीयं महत्तमरूपं सेवकं पुरुषरूपं प्रकाशघनस्वरूपं मूर्तं भगवत्सममूर्तिकं प्रकाशघनैकरसनित्यमूर्तिस्वरूपं पुरुषवेषं पुरुषपरिमण्डलाकारमस्ति, स्वरूपेणानेन पुरुषोत्तमसेवायां मुख्यदासत्वेनाहर्निशं तिष्ठति, परिपाठयति चान्यान् पुरुषोत्तमसेवारीतिम्, तदिदं ब्रह्म निर्विकारं निरंशञ्च, तस्य निगमादिके यत्सर्वरूपत्वं कथितं न तत् विकारितया प्रतिपादितं किन्तु कार्यात्मकत्वहेतोः तद्यथा -

---

१ श्रीहरिवाक्यसुधासिन्धुः त १७५ श्लो. ७, ८

[१] निर्विकारं निरंशञ्च ब्रह्मास्ति श्रुतिवर्णितम् ।
कथं तत्सर्वरूपं स्यात्सविकारपदार्थवत् ॥

यत्त्वस्य सर्वरूपत्वं कथितं निगमेऽस्ति तत् ।
न विकारितया किन्तु हेतोः कार्यात्मकत्वता ॥

सर्वकारणता सर्वाधारता ब्रह्मणोऽस्ति हि ।
पृथङ्नामधेयमाधारात् तिष्ठेत् कार्यं च कारणात् ॥

एवंप्रकारस्यातिप्रियस्याक्षरस्य महिम-वर्णनमपि कृतं भगवता यथा -

[२] एकैकरोम्णि तस्यैव सन्त्यंडान्यणुवन्मुने ।
नैतावता तु ब्रह्माण्डगोलसूक्ष्मत्वसंभवः ॥

यावत्प्रमाण उदितः शास्त्रे ब्रह्माण्डगोलकः ।
स तावानेव भवति तद्विधा अपरेऽपि च ॥

ब्रह्मणोऽति महत्वेन तदणूपमतोच्यते ।
रैवताद्रेर्यथा मेरोः पुरतस्त्वस्ति सूक्ष्मता ॥

तथा च प्रथमप्रकरणीयद्विषष्टितमतरंगेऽपि -

[३] पुरुषादक्षरं ब्रह्म वर्तते हि महत्तरम् ।
अणुवत्वपरिवर्तन्ते यत्र ब्रह्माण्डकोटयः ॥

अग्रतस्तन्महत्ताया इतरेषां तु सर्वशः ।
महत्वमग्रे करिणो युकानामिव दृश्यते ॥

---

१ श्रीहरिवाक्यसुधासिन्धुः त १२६ श्लो. ३१, ३२, ३३
२ श्रीहरिवाक्यसुधासिन्धुः त १७५ श्लो. ९, १०, ११
३ श्रीहरिवाक्यसुधासिन्धुः त ६२ श्लो. २९ - ३८

अतस्तस्य महत्तां तु शक्ता वर्णयितुं न वै ।
वेदाः शास्त्रपुराणेतिहासादय इयत्तया ।।

ईदृक्तदपि कृष्णस्य धामास्तीशेश्वररस्य हि ।
महतत्वं तस्य तु तदा को वा वर्णयितुं क्षमः ।।

स एव पुरुषद्वारा जगत्सर्गानवाप्ययान् ।
करोत्यतः सर्वकर्ता नियंता चाश्रयः परः ।।

तथा च पञ्चालप्रकरणस्यादिमे –

उत्तरोत्तररूपेण वर्णयामास तारतम्यं भगवान् यथा - पशुसुखान्मनुष्यसुखमधिकम्, मनुष्यसुखाद् राजसुखमधिकम्, राजसुखाद् देवसुखमधिकम्, देवासुखादिन्द्रसुखमधिकम्, इन्द्रसुखाद् बृहस्पति सुखमधिकम्, बृहस्पतिसुखात् ब्रह्मणः सुखमधिकम्, ब्रह्मणः सुखाद् वैराजस्यसुखमधिकं, वैराजसुखात्प्रधानपुरुषस्यसुखमधिकं, प्रधानपुरुषसुखाद् मूलप्रकृतिभर्तुरधिकम्, तस्मादपि भगवद्धाम्न अक्षरस्य तु सर्वाधिकमिति । तथा च मूले -

[1]नृणां सुखात्सुखं राज्ञोऽधिकं तस्माद् दिवौकसाम् ।
ततोऽपीन्द्रस्य तस्माच्च विधेरस्त्वधिकं सुखम् ।।

वैराजस्याधिकं तस्मात्प्रधानपुरुषस्य तत् ।
मूलप्रकृतिभर्तुस्तद् वर्तते च ततोऽधिकम् ।।

ततोऽक्षरब्रह्मसुखं वर्तते‍ऽत्यधिकं त्विति ।
वेदादौ गीयते तस्मात् कार्ष्णं यत्स सुखाम्बुधिः ।।

एवंप्रकारकमक्षरंब्रह्मदासत्वयुक्तनित्यपरमस्नेहैक्यसंबंधेन परब्रह्मणा संलग्नत्वात्, सर्वविधस्वतन्त्रानन्तमुक्तेष्वपि मुख्यत्वात्, परमचरमस्नेहादेव मुक्तानां

---

१ श्रीहरिवाक्यसुधासिन्धुः त १२७ श्लो. ३१, ३२, ३३

भगवतोऽप्यधिकरणाच्च यत्र यत्र परब्रह्मणः मानुषमूर्तिरूपेण गमनं भवति तत्र तत्राक्षरब्रह्मणोऽपि स्थितिरवश्यंभाविनी, उक्तं च -

[1] साक्षात्कृष्णो नराकारो वर्तते यत्र भूतले ।
तत्रैव तस्य धामादि सर्वं भवति वैभवम् ॥

यदा प्रादुर्भवत्यत्र कृपया श्रेयसे नृणाम् ।
तदा सह स्वधाम्ना च परिवारेण जायते ॥

अतो यत्र भवेत्कृष्ण तत्र तत्रैव सर्वशः ।
पार्षदाः शक्तयो धाम सन्तीत्येवावगम्यताम् ॥

किञ्च सर्वाधारः, सर्वत्रान्वयि, निराश्रयः, महान्, ब्रह्म, चिदाकाशम्, अक्षर मित्याद्यनेकनामतत्तदनुरूपगुणवतोऽप्यक्षरस्य पारतन्त्र्यमेव। ईश्वरेच्छयैव तस्य स्वातन्त्र्यं परिकल्पितं नान्यथा । तस्यैव परतन्त्रस्याक्षरस्य सप्तमतरंगेऽन्वयव्यतिरेकत्वञ्च वर्णितमस्ति यथा -

[2] पुरुषस्य च मायायाः सूर्यादीनां प्रशास्तृणा ।
नेकांडाश्रयतेत्युक्तं ब्रह्मणोऽन्वयलक्षणम् ॥

सर्वत्र व्यापकत्वेऽपि व्योमवत्तदसंज्ञिता ।
कृष्णस्यनुगधामत्वं व्यतिरेकोऽस्य गद्यते ॥

ब्रह्मण्यस्मिन् मुक्तपुरूषाणामपि गणना भवति यतो भगवदुपासनयाक्षर सादृश्यमापन्नः तेऽपि सर्वविधसामर्थ्ययुक्ताः सत्यसंकल्पत्वात् सत्यकामत्वात्, तत्र प्रमाणमस्ति यत् महामायाभर्तुः पुरुषस्य वर्णनेऽनेकेषु स्थलेषु ब्रह्मशब्दस्य दर्शनात्। तत्र प्रथमं तावद् पुरुषस्य मुक्तत्वं प्रतिपादितं यथा - प्रथमप्रकरणस्य ५१तमे तरंगे - महामाया महापुरुषस्यैकांशादुद्भवति (प्रभवति - समर्था भवति इत्यर्थः) अतो महापुरुषदृष्ट्या वीक्षणे सति महामाया नास्ति एकल पुरुष एवास्ति, अयं महापुरुषोऽपि पुरुषोत्तम भगवतो धाम यदक्षरं

---

१ श्रीहरिवाक्यसुधासिन्धुः त ७१ श्लो. २८, २९, ३२
२ श्रीहरिवाक्यसुधासिन्धुः त ७ श्लो. १२, १३

तस्यैकदेशादुद्भवति, अतोऽक्षरदृष्ट्या वीक्षणे महापुरुषादयः सर्वे न सन्ति, एकमक्षरमेवास्ति, अत्रमहापुरुषोऽक्षरधाम्न मुक्त एव, एवं प्रकारेणनैकेस्थलेषु भिन्न भिन्न रूपेण पुरुषस्य मुक्तत्वं प्रतिपादितमस्ति। तथा च प्र. ६३तमे तरंगे- "प्रधानपुरुषस्य कारणं मूलप्रकृतिर्ब्रह्म चे"ति, अत्र मूलप्रकृत्या सह ब्रह्मपदं मुक्तात्मकस्य पुरुषात्मकस्य बोधकम्, कारियाण्याः १०तमे तरंगे- "प्रकृतिपुरुष समो ब्रह्मसमोऽक्षरसमोऽपि भवेत्" पुरुषोऽत्र ब्रह्म शब्देन वर्णितः महामुक्तः। अक्षरञ्च द्वेधा तेजोरूपं मूर्तिरूपं च । अत्र मूर्तिरूपं ग्राहयम्, लौहस्य प्रथमे - "अनन्तकोटयोऽक्षररूपामुक्ताः" इत्याद्यनेकस्थलपरिदर्शनाद् ज्ञायते यत् ब्रह्मकोटावक्षरमुक्तानामपि भवति सन्निवेशः इति शम् ।

## परमतत्वपरब्रह्मनिरूपणम्

नारायणो, वासुदेवः, स्वतन्त्रः, स्वप्रकाशकः, आनन्ददिव्यमूर्तिः, विष्णुः,कृष्णोऽच्युतोऽव्ययः, सर्वज्ञः, सत्यसंकल्पः, सर्वकर्मफलप्रदः, अन्तर्यामि, परमेश्वरः, सर्वशक्तिसेवितः, जीवेश्वरकालमायाप्रकृत्यक्षरपर्यन्तानां सर्वेषां नियामकः, उपास्यः, परमप्राप्यः सर्वकारणकारणं, निखिलहेयप्रत्यनीक-कल्याणैकतानः, स्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपः, स्वाभाविका-नवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः प्रभृत्यसंख्येयकल्याणगुणगणमहोदधिः, स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्वल्यसौगन्ध्यसौकुमार्यसौन्दर्यलावण्ययौवनाद्यनन्तगुणनिधिदिव्यरूपः, विविधविचित्रानन्तभोग्यभोक्तृ-वर्गपरिपूर्णनिखिलजगदुदयविभवलयलीलः, सर्वेश्वरोऽपारकरुणानिधिराश्रित-वात्सल्यविवशः, परात्परपूर्णपुरुषोत्तमः श्रीहरिवाक्यसुधासिन्धौ निम्नांकितैः शब्दैः (संज्ञाभिः) प्रतिपादितः ।

साक्षात्पुरुषोत्तमनारायणः, पुरुषोत्तमो भगवान्, स्वेष्टदेवप्रत्यक्षश्रीकृष्ण परमात्मा, परमेश्वरः, श्रीकृष्णभगवान्, अक्षरातीतः, महाराजः, श्रीकृष्णपुरुषोत्तम नारायणः, प्रकटप्रमाणश्रीकृष्णनारायणः, ब्रह्ममहोलपतिः, अन्तर्यामि, व्यापकः, श्रीहरिः, श्रीकृष्णभगवान्, पुरुषोत्तमभगवान्, श्रीजीमहाराजः, स्वामी, हरिः, श्रीकृष्णपुरुषोत्तमः, सर्वस्वामी, राजाधिराजः, प्रकटपुरुषोत्तमः, भगवान्पुरुषोत्तमः, अक्षरातीतभगवान्पुरुषोत्तमः, परब्रह्मपुरुषोत्तमभगवान्, नारायणः, श्रीकृष्णप्रत्यक्षपुरुषोत्तमः, श्रीकृष्णनारायणपुरुषोत्तमः, श्रीकृष्णपुरुषोत्तमपरमात्मा, भगवद्भक्तभक्तः, ब्रह्मश्रीकृष्णः, श्रीकृष्णभगवन्मूर्तिः,श्रीकृष्णवासुदेवपरब्रह्म, साकारपुरुषोत्तमः, परब्रह्मपुरुषोत्तमः, परमात्मा, स्वामिनारायणः, पुरुषोत्तमभगवान्

वासुदेवः, प्रत्यक्षभगवान्, ब्रह्म, ज्योतिःस्वरूपः, ज्ञानरूपः, तत्त्वं, सूक्ष्मः, निरञ्जनः, क्षेत्रज्ञः, सर्वकारणम्, वासुदेवः, विष्णुनिर्गुणः, कैवल्यमूर्तिः, श्रीकृष्णभगवत्स्वरूपम्, नारायणपुरुषः, अक्षरधामपतिः, प्रत्यक्षमहाराजः, आत्मा, भगवन्मूर्ति, आत्मतत्त्वम्, सर्वावतारकारणम्, ईश्वरेश्वरः, मुक्तेश्वरः, श्रीहरिकृष्णः, सहजानन्दस्वामी, भक्तिधर्मपुत्रोऽन्तर्नियामकोऽन्तर्यामी साक्षीत्यादि।

सोऽयं भगवान् एकोऽद्वितीयश्च, समभ्यधिकद्वरिद्रोऽयमितिविषयमवलम्ब्य प्रतिपादितं भगवताद्वितीयत्वं तद्यथा - ९०

[1] भक्तिज्ञानप्रतापेन शुकब्रह्मशिवैः समाः ।
भवेयुः पुरुषेणापि केचिच्चाक्षरसन्निभाः ॥

न तु कोऽपि भवेत्क्वापि पुरुषोत्तमसन्निभः ।
एक एवेत्यतो वेदैर्गीयतेऽनुपमो हि सः ॥

अयं भावः- केचन प्रत्यक्षं भगवतो महात्म्यज्ञानस्य ऐकान्तिक्या भक्तेश्च प्रभावेण वृद्धया बलिष्ठफलानुदानतत्परया स्थित्या केचित् शुकसमाननिरावरण भावसार्वज्ञ्यसामर्थ्यवन्तः भगवतः श्रीहरेर्मुक्ता भवेयुः, यद्वाऽवतारिण्युपासनान्यूनत्वे शुकवदुपासनावत्वे शुकवत्स्थितिमन्तो भवेयुः, केचित्तपः सहकृतरचनात्मकभक्तिमन्तश्चेद् ब्रह्मणा वेधसा समा भवेयुः (एते वैराजनारायणसमं परमात्मानं जानन्ति ततस्तथाविधाः भवन्ति) केचित् सदाशिवं ब्रह्मस्वरूपं मत्वोपासते ते तत्प्रतापेन (भगवन्निहिततत्प्रतापेन) शिवेन समाना ध्यानियोगिभक्तिमन्तो जायन्ते, केचित्प्रकृतिपुरुषं परमात्मानं मत्वोपासते ते प्रधानाधिष्ठातृपुरुषसमाः प्रधानपुरुषेश्वराः सृष्टीश्वरा जायन्ते, ये त्वक्षरातीतं यथार्थ मां पुरुषोत्तममुपासते ते त्वक्षरधाममुक्ताः ब्रह्ममुक्ता अक्षरधामसमा साकारा मम मुक्ता मत्सेवका जायन्ते परंतु मम पुरुषोत्तमोपासनयापि पुरुषोत्तमो न कोऽपि भवति, पुरुषोत्तमस्त्वेक एव। तथा चान्त्यस्य सप्तत्रिंशत्तमे तरंगे -

---

१ श्रीहरिवाक्यसुधासिन्धुः त. १०६ श्लो. १५, १६

[1] तेजःपुंजेऽक्षरे धाम्नि, नित्यं कृष्णो विराजते ।
तद्भक्ताश्च तदाकाराः सेवन्ते स्वामिनं हितम् ॥

कृष्णः स्वामी सेवकास्ते पुरुषाः पुरुषोत्तमम् ।
भजन्तीति विशेषोऽस्ति तत्सारूप्येऽपि सेविनाम् ॥

कृष्णतुल्यः कृष्ण एव, न त्वन्यः कोऽपि पुरुषः ।
पारमस्य महिम्नस्य कोऽपि याति न कुत्रचित् ॥

अक्षरब्रह्मणो ब्रह्मधामस्थमुक्तानां च पुरुषोत्तमसारूप्येऽपि, श्रीहरिसमानरूपत्वेऽपि, सेवकानां मुक्तानां नित्यभेदोऽस्तीति। ज्ञातव्यमास्तेऽत्र -श्रीहरिकृष्णभगवत्तुल्यः स एव स्वयं श्रीहरिकृष्णो भगवान् सर्वोपरि वर्तते, स्वसमानाऽतिशयवर्जितो भगवान् स्वयमेव तुल्यत्वं द्वयोः स्थाने एका मूर्तिर्द्वेधाऽत्रत्या धर्मपुत्रत्वोपचरिताक्षरधामस्था मुक्तसेव्येति, अत्र भेदोऽप्यभेदायते, अभेदोऽपि कल्पनया भेदायते - राहोः शिर इतिवत्, चेतनस्य चैतन्यमितिवत्, भगवत्स्वरूपस्यानन्द इतिवत्, भगवतो मूर्तिरितिवत्, कश्चिदपि भगवदन्यो भगवान् परमपुरुषो नास्ति स एक एवास्ति, पारमस्यप्रत्यक्ष श्रीहरेर्माहात्म्यस्य महत्ताया अन्तं कोऽपि अनन्तमुक्तान्यतमः कश्चिदपिमुक्तो न याति, बुद्ध्या वा शक्त्या स्वरूपोपास्त्या वा प्रत्यक्षदृष्ट्या मुक्ताद्याः पारं न यान्ति, ब्रह्मलोके, गोलोके, वैकुण्ठे, श्वेतद्वीपेऽव्याकृतेऽमृते ब्रह्माण्डे वा सृष्टौ स्थूले सूक्ष्मे वा स्थितस्यास्य परमात्मनोऽवतारिणः केऽपि पारं - इयत्तावसानरूपं न यान्तीति ।

## परब्रह्मणः सर्वशरीरित्वं सर्वात्मात्वं वा

सोऽयं भगवान् पृथिव्यादिसर्वतत्त्वानामात्मा, प्रधानपुरुषस्यात्मा, शुद्धपुरुषस्य महामायाया पत्युर्मुक्तपुरुषस्याप्यात्मा, प्रकृतेश्चाप्यात्मा, ताभ्यां परस्याक्षरस्याप्यात्मास्ति, एतच्चाक्षरादिकं सर्वं भगवतः चेतनजातं शरीरं विद्यते, भगवान्सर्वेभ्य एतेभ्यश्चातीवसूक्ष्मश्चातीवशुद्धश्चातीवनिर्लेपश्चातीवप्रकाशवांश्चास्ति इति प्रतिपादितं कारियाण्या अष्टमे भाषावचनामृतेऽनेन भगवतः सर्वशरीरित्वं भवति स्फुटम्। तथा चाष्टादशोत्तरशततरंगे-

---

१ श्रीहरिवाक्यसुधासिन्धुः त २६० श्लो. १२, १३, १४

[1]आत्मात्मा चाक्षरात्मा च सोऽस्ति कृष्णः परात्परः ।
ब्रह्मरूपानंतकोटिमुक्तसंघनिषेवितः ॥

द्रष्टव्यमत्र "ब्रह्मरसायनभाष्यम्" तत्र - "अत्राक्षरं ब्रह्मधाम श्रीपुरुषोत्तममूर्तेः प्रकाशात्मको ब्रह्मलोकश्चेतनोऽन्तर्यामिशक्तिस्वरूपः सर्वसाक्षिस्वरूपः सर्वान्तरात्मस्वरूपः सर्वप्रकाशः सर्वजडचेतनविशिष्टं ब्रह्मतत्वं चतुर्थभेदेन श्रीहरिणा परिगणितं - तत् प्रकृतिपुरुषादीनामात्माविशिष्टं ब्रह्म मुक्तेष्वपि प्रकाशोऽयमेव श्रीहरेरितिप्रकाशात्मकाक्षराद् ब्रह्मणः सर्वात्मनोऽप्यात्मा साकारे ब्रह्मणि साक्षाच्छ्रीहरिर्विराजते, इति साकाराक्षरब्रह्मणोऽपि साक्षादात्मा स्वप्रकाशोऽपि श्रीहरिः प्रकाशी विराजते, इति प्रकाशस्याप्यात्मा, सर्वात्मात्मा, श्रीहरिरित्येवमात्मात्माक्षरात्मापरादक्षरात्परश्च परमात्मा श्रीस्वामिनारायणो भगवान् मम स्वामी शरीरी पतिर्निमायकः कर्मफलप्रदः प्रकाशप्रदः ज्ञानप्रदः प्रवर्तकोऽभिलाषकश्चापि सर्वशक्तिदाता जीवनप्राणश्चिच्चैतन्यापूरकश्चानन्दसंभर्ता तादात्म्यगृहपतिर्ममेति ।"

तथा चान्त्यस्यसप्तत्रिंशत्तरंगे-

[2]स्वधामस्थस्त्वयं कृष्णः स्थितो ब्रह्माण्डकोटिषु ।
अन्तर्यामि स्वरूपेण जीवेश्वरव्रजेष्वपि ॥

अश्मकाष्ठादिगस्यापि बह्ने रूपं यथा पृथक् ।
हरेस्तेषु स्थितस्यापि त्वन्यदेव तथैव तत् ॥

जीवेश्वराणां सर्वेषां जीवनं च स एव हि ।
तं विना ते न वै किञ्चित्कर्तुं भोक्तुं तथेशते ॥

१ श्रीहरिवाक्यसुधासिन्धुः त ११८ श्लो. ५७
२ श्रीहरिवाक्यसुधासिन्धुः त २६० श्लो. १७, १८, १९

भगवानयं परपुरुषोत्तमः स्वकीयाक्षरधामावस्थितः सन्नेव सृष्टिकोटि ब्रह्माण्डकोटिषु स्थितेषु जीवेश्वरसमूहेषु अन्तर्यामिशक्तिरूपेणाऽवस्थितो यथायथं तत्तत्कर्मफलप्रदाता भवति, सर्वेषु शरीरितया स्थितस्यास्य परिणामित्वमापतेदितिचेन्न, पाषाणेन्धनाद्यवस्थितस्यापि वह्नेः स्वरूपगुणादि-दिभ्यो भिन्नमेव, जीवेश्वरगुणानामीशे नियामकेऽन्तर्यामिणि परमात्मन्यसंक्रमान्न तद्दोषदूषितत्वापत्तिः, साधुदुःखे दुःखिता तु दयया वात्सल्येन भगवतो भवति, बालदुःखे मातुर्दुःखवत्, सर्वान्तर्यामी श्रीहरिकृष्णमहाराज एव सर्वेषां जीवेश्वराणां जीवनं प्राणनशक्तिप्रदोऽस्ति, जीवेश्वराः स्वप्राणनिर्वाहकं श्रीहरिं विना किमपि कर्तुं ज्ञातुं भोक्तुं सञ्चरितुं सञ्चालयितुं समर्था न भवन्ति , ईदृग्जीवेश्वरचैतन्यप्रदो ज्ञान क्रियेच्छाशक्तिप्रदो सर्वशरीरीभगवानिति।

तथा च द्विसप्ततितमे तरंगे –

[1] **क्षरात्मा चाक्षरात्मा च क्षराक्षरपरोऽस्ति सः ।**

तथा च -

[2] अक्षरस्यापि कृष्णस्तु कारणं चाश्रयो मतः ।
**प्रेरकश्चात एवाऽसौ सर्वसेव्य उदीरितः ॥**

एवमनेकेषु स्थलेषु भगवतः शरीरित्वं वर्णितमस्ति, कीदृग्भगवतोऽऽकारः इति जिज्ञासायां प्रतिपादितमन्त्यस्याष्टत्रिंशत्तरंगे यथा-

**[3] अक्षरे धाम्नि कृष्णस्य तद्भक्तानां च सर्वशः ।**
**याः संत्याकृतयस्तास्तु सत्या दिव्याश्च भासुराः ॥**

**पुरुषाकृतयः सन्ति स च ते तत्र धामनि ।**

---

१ हरिवाक्यसुधासिन्धुः त. ७२ श्लो. ३२
२ हरिवाक्यसुधासिन्धुः त. १३६ श्लो. ३५
३ हरिवाक्यसुधासिन्धुः त. २६१ श्लो. ५, ६, ७

सच्चिदानंद रूपाश्च दिव्यांगवस्त्रभूषणाः ।।

तैः सेवितोऽसौ विविधैः प्रेम्णा दिव्योपचारकैः ।
परमानंदस्तेभ्यो वर्तते तत्र सर्वदा ।।

अयं भावः - धामन्यक्षरे श्रीहरिर्मुक्ताश्चात्रत्यपुरुषवद् द्विभुजाः सच्चिदानंद प्रकाशरसघनमूर्तयो वर्तन्ते तथा तत्राक्षरे धाम्नि स्थितो भगवानत्रायं भक्तैरिव तत्र मुक्तपुरुषैर्नैकविधदिव्योपचारतः सेव्यमानो मुक्तानां परमानन्दसम्पादन परायणः सदा विराजमानोऽस्ति।

तथा च -

[1] स तु प्रभुर्घनश्यामोऽप्यवदातोऽतितेजसा ।
आजानुबाहुयुगलो मनोहरपदद्वयः ।।

अतिसौम्यो नराकारो किशोरः करुणानिधिः ।
उपविष्टः स्थितः क्वापि चलन् क्वापि च दृश्यते ।।

तन्मुखैकदृशो मुक्ताः परितः सन्ति कोटिशः ।
पश्यामि तमहं नित्यं प्रत्यक्षं पुरुषोत्तमम् ।।

तथा च -

[2] यादृग्रूपो हरिर्नित्यं, वर्ततेऽक्षर धामनि ।
तादृशं श्रूयतां वच्मि, नोपमा यस्य कुत्रचित् ।।

सच्चिदानंदरूपोऽतिलावण्यो दिव्यविग्रहः ।
योऽप्राकृतेंद्रियो दिव्यवासोलंकारमंडितः ।।

---

१ हरिवाक्यसुधासिन्धुः त. १४६ श्लो. २१, २२, २३
२हरिवाक्यसुधासिन्धुः त. १२६ श्लो. २२ - ३०, ३३

दिव्यचंदनपुष्पस्त्रक्शेखरोत्तंसराजितः ।
कोटिकंदर्पसौन्दर्यः शांतमूर्तिर्दयानिधिः ॥

एकैकरोमनिर्गच्छत्कोटिकोट्यर्कतेजसा ।
अनैकांतिकदुर्दृश्योऽनंतशक्तिकलाधिपः ॥

अनंतकोटिब्रह्मांडमहाराजो महेश्वरः ।
कालकालः स्वतन्त्रश्च नियंतासकलात्मनाम् ॥

सुरूपकोटियोषेक्षासुखादिविषयोद्भवम् ।
सुखं यदीयसौख्याग्रे प्रयात्येवाऽतितुच्छताम् ॥

सोऽसौ कृष्णः सदैवास्ते द्विभुजो मुक्तमोदनः ।
चतुर्दोः स्वेच्छया क्वापि क्वापि चाष्टभुजस्तथा ॥

स एव हि वराहादिरूपं रामादि चेच्छया ।
तत् तत् कार्याय धत्ते स्वं, सकलैश्वर्यमत्यजन् ॥

यथोपयोगं स्वैश्वर्यं तत्र तत्र निजेच्छया ।
आविष्कृत्य पुनः स्वस्मिंस्तत्तिरोधापयत्यसौ ॥

अतः स सकलैश्वर्यसम्पन्नो हि नराकृतिः ।
अस्तीत्येवावधातव्यं न ह्यसौ मर्त्यधर्मवान् ॥

तन्मुखैकदृशो मुक्ताः परितः सन्ति कोटिशः ।
पश्यामि तमहं नित्यं प्रत्यक्षं पुरुषोत्तमम् ॥

अनेन ज्ञायते यत् अक्षरे धामनि भगवतः स्वरूपं मनुष्याकारं सदासाकारं वर्तते तथा च तदाश्रितानामुक्तानामपि स्वरूपं मनुष्याकारमेव, अनेन निराकार मतखण्डनं कृतं भगवता। अन्येष्वपि स्थलेषु कण्ठत एव निराकारत्वस्य खण्डनं कृतमस्ति तद्यथा -

[१] स ऐक्षतेति श्रुत्युक्तं सर्गादौ प्रकृतीक्षणम् ।
निःप्रतीकस्य कृष्णस्य क्वापि नैवोपपद्यते ॥

यस्य चक्षुर्भवेत्तस्य स्युरंगास्यपराण्यपि ।
कृष्णः सांगक एवेति ततो ज्ञेयो विचक्षणैः ॥

शास्त्रे यत्र नीःप्रतिको भगवान् वर्णितो भवेत् ।
स तु प्राकृतं दोःपादाद्यंगाभावात्तथोदितः ॥

सांगको वर्णितो यत्र भवेच्छास्त्रे स तत्र तु ।
दिव्यविग्रहता तस्य ज्ञेयाऽमायिकता तथा ॥

निषेधो यत्र चांगानां सच्छास्त्रे स्यात्कृतो हरेः ।
स तु ज्ञेयः प्राकृतानां दिव्यानां न तु कुत्रचित् ॥

यत्र सांगक शब्देन पाणिपादमुखादिभिः ।
सहितत्वं ह्यवयवैः प्रोक्तं भगवतो भवेत् ॥

तद्धीनत्वं निःप्रतीकशब्देनेति च तत्र तु ।
अंगैरप्राकृतैर्दिव्यैर्विशिष्टः कृष्ण उच्यते ॥

अयंभावः - केचित् शांकरग्रन्थपाठनपराः वेदान्तिनः परब्रह्मानादिश्रीकृष्णनारायणं परमात्मानं निरंगकं निराकारं निरवयवं प्राहुः, तत्र निरवयवत्व प्रतिपादने च तथाविधा निरवयवत्वप्रतिपादिकाः श्रुतयः – [२] "अपाणिपादोजवनो ग्रहीता, पश्यत्यचक्षुः स श्रृणोत्यकर्णः" [३] "अपाणिपादं नित्यं विभुसर्वगतं " [४] "अप्राणजो

१ हरिवाक्यसुधासिन्धुः त. ४५ श्लो. ८-१४
२ श्वेताश्वतरोपनिषत् ३/१९
३ मुण्डकोपनिषत् - १/१/६
४ मुण्डकोपनिषत् - २/१/२

ह्यमनाः शुभ्रो" [१] "अप्राणममुखमश्रोत्रमवाङ्मनः" [२] "न सन्दृश्यते रूपमस्य" [३] "न चक्षुषा गृह्यते नापि वाचा" [४] "न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः" इत्यादयः प्रमाणार्था पठन्ति।

अथ रामानुजाचार्यमतानुसारेण पठितवेदान्तग्रन्थास्ते [५] "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेशः आप्रणखात् सर्व एव सुवर्णः" [६] "तस्य यथा कप्यासंपुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्व पाप्मभ्य उदितः" [७] "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" [८] "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" [९] "स ऐक्षत" [१०] "एष आत्माऽपहतपाप्माविजरोविमृत्यु र्विशोको - सत्यकामः सत्यसंकल्पः" [११] "इन्द्रो मायाभिः पुरुरूप ईयते" "सदा पश्यन्ति सूरय" इत्यादिकाः श्रुतयः भगवतः साकारत्वप्रतिपादने पठन्ति तत्र साकार निराकारयोर्मध्ये केषां मतं सत् इति प्रश्ने परमात्मा श्रुतिषु निगदितः परब्रह्म "आपाणिपादं" इत्यादिश्रुत्या सर्वथा पादकरचक्षुःकर्णप्राणमनोरूपप्रतिमाशरीरसकलेन्द्रिय विवर्जितोऽत एव सर्वाकार वर्जितो निराकार उक्त इति चेन्न, प्रकृतिस्त्रिगुणवती तज्जन्यमहत्तत्वाद्यापृथिव्यन्ततत्त्वानिप्राकृतानि, तज्जन्याकारः प्राकृताकारः, परमेश्वरस्यप्राकृताकाररहितत्वेन निषेधश्रुतीनां प्राकृताकाररहितत्वेनार्थसंग्रहात्, हिरण्यश्मश्वादिसाकारश्रुतीनां दिव्यसच्चिदानंदघनस्वैकतत्त्वात्मक दिव्यसाकार-सगुणस्वरूपसहितत्वेनार्थसंग्रहाच्च समन्वयात्, अविरोधेनार्थयाथार्थ्योपपत्तिः विप्रतिपत्तिरस्थानेति, एवं सर्वा अपि श्रुतय याथार्थ्यपराः साकारसगुणसविशेषपरब्रह्मबोधिका । अत एव भगवतः स्वरूपं सर्वदा साकार एव ।

---

१ मुण्डकोपनिषत् २/१/२
२ कठोपनिषत् - ६/१९
३ मुण्डकोपनिषत् - १/३/८
४ श्वेताश्वतरोपनिषत् ४/१९
५ छान्दोग्योपनिषत् - १/६/६
६ छान्दोग्योपनिषत् - १/६/७
७ मुण्डकोपनिषत् - ३/१/३
८ तैत्तिरीयोपनिषत् - २/१/१
९ बृहदारण्यकोपनिषत् - १/२/५
१० छान्दोग्योपनिषत् - ८/१/५
११ बृहदारण्यकोपनिषत् - २/५/१५

एवमज्ञात्वैव भगवदाकारखण्डनतत्पराणामधमत्वमपि प्रतिपादितं सुधासिन्धौ यथा -

[1]यः साकृतिं न जानाति कृष्णं तस्य तु यो भवेत् ।
दोषः स त्वनिवार्योऽस्ति प्रायश्चितशतैरपि ॥

नित्यं साकारमेव श्रीकृष्णं जानाति यः पुमान् ।
सर्वं तेन तु विज्ञातं सर्वं तेन कृतं तथा ॥

तथा चाकारखण्डयतां कृते भगवद्द्रोहकर्तेति पदवी अपि प्रदत्ता भगवता यथा -

[2] एवं सर्वनियन्तारं सर्वकर्तारमेव च ।
तं यो विद्यान् स वै भक्तः प्रोक्तो द्रोहीतरस्तथा ॥

विद्वांसोऽप्यत्र केचिच्च, तं सदा दिव्यविग्रहम् ।
अप्यरूपं विदुर्विद्धि तदपि द्रोहमेव हि ॥

अत्रत्योदाहरणं अत्यावश्यकरूपेण ज्ञातव्यम् तद्यथा - सम्पूर्णांगं स्वनृपतिं कश्चन "अस्माकम् राजा नासाकर्णादि हीनोऽस्ति" एवं कीर्तयेत् तदा तेन नरपतेर्द्रोह एव कृतः, तथैव दिव्यांगस्याप्यरूपत्वकथनं द्रोह एव, तथा च -

[3]किञ्च सर्वापराधेषु कृष्णस्याकारखण्डनम् ।
महापराधो विज्ञेयः स कार्यः सर्वथा न वै ॥

निजेऽक्षरे परे धाम्नि कोटिसूर्यादिभास्वरे ।
सदा दिव्याकृतिः कृष्णोः भगवान् पुरुषोत्तमः ॥

मुक्तैर्विराजते दिव्यब्रह्मरूपैर्निषेवितः ।
स एव कृपया भूमौ जायतेऽत्र नराकृतिः ॥

---

१हरिवाक्यसुधासिन्धुः त. १२७ श्लो. ३६, ३७
२ हरिवाक्यसुधासिन्धुः त. २०२ श्लो. ११, १३
३ हरिवाक्यसुधासिन्धुः त. ७१ श्लो. ०९, १०, ११

तथा च निराकारवादिनां कृते स्वयं भगवानेव कांश्चन तर्का उपस्थापयति यथा -

[1] निराकारान्न साकार ब्रह्मादेरुद्भवो भवेत् ।
यथाकाशात् साकृतीनां घटादीनां न संभवः ॥

पुरुषाकारस्य श्रुतिषु वर्णनात् नवलकिशोरतर स्वरूपो भगवान् परब्रह्म, यथा च लोकेऽपि विसजातीयाकारं कारणं न भवति, सूक्ष्ममपि सजातीयाकार कारणं भवति, कम्बुग्रीवाद्याकृतिमतां घटादीनामाकाशादनाकारादुत्पत्तिर्नभवति, तथा निराकारत्परब्रह्मणः सकाशात् साकारविद्यादिसृष्ट्युद्भवो न भवेत्, (नियमोऽयं मूर्तद्रव्याविर्भाव इतिमात्रः) तथा च -

[2] निराकृतित्वं कृष्णस्य, साकृतित्वं च तत्वतः ।
न वेत्ति पण्डितम्मन्यो वेत्ति चेत्तत्सदूषणम् ॥

साकारं मायिकैस्तत्वैर्निराकारं त्वरूपिणम् ।
स तं वेत्यत्र दोषं तु स ऐक्षत श्रुतिर्जगौ ॥

मायातो जननात्पूर्वं तत्त्वानामीक्षणं हरेः ।
अत्रोक्तं तदृते तेभ्यस्तस्य विग्रह ईरितः ॥

देहं विना न नेत्रं स्यात्तद्विनाऽपीक्षणं न च ।
अतो मायिकतत्त्वेभ्यः प्राक् कृष्णो दिव्यविग्रहः ॥

अरूपिणस्त्वीक्षणं च वक्तुं शक्यं न सर्वथा ।
दोषोऽत उभयत्रापि दृश्यते श्रुतिशासनात् ॥

१ हरिवाक्यसुधासिन्धुः त. १४२ श्लो. ६
२ हरिवाक्यसुधासिन्धुः त. १३३ श्लो. २२-२६

सृष्टिकरणार्थं पुरुषोत्तमो निरीक्षते तेन "दिव्यचक्षुः" "सर्वतश्चक्षुः" "चक्षुषा च दिव्यमूर्तिः" "सर्वतस्मात्" सम्पूर्णान्वयिव्यतिरेकिणी च मूर्तिः "द्यावाभूमीजनयन्देव एको विश्वस्यकर्ता भुवनस्य गोप्ता" इति ज्ञान चिकीर्षाकृतिमत्वं रक्षाकारिव्यक्तितत्वं च दिव्यं सिद्धयति, स्वरूपतो निराकारश्चेत्तस्येक्षणं निरर्थकं स्यादतो मायिकसाकारत्वे दिव्यनिराकारत्वे तथाविधज्ञानिगताभ्रान्तिरेव।अतो सुसच्छास्त्रज्ञादेकान्तिकोपासकात्साधुजनान्मुमुक्षुणाभक्तेनश्रीहरेः परपुरुषोत्तमस्य सदा शाश्वतसाकारसगुणता ज्ञातव्या, मायिकाकारमायिकसगुणतारहितत्वं च निश्चेतव्यम्, तथा च-

[१] मायागुणैर्विहिनत्वान्निर्गुणः परमेश्वरः ।
निजधामस्य एवासौ सर्वत्र व्यापकोऽस्ति च ।।

मूर्तः सूर्यः स्वजेतोभिर्जगद्व्याप्यास्ति तत्पृथक् ।
यथातथासोऽपि मूर्तः कांत्या व्याप्यास्ति तत्पृथक् ।।

सदा दिव्याकृतेस्तस्य रूपं त्वपरिणामि यत् ।
अतोऽरूप इति प्रोक्तो निराकारश्च स कुत्रचित् ।।

कोटिकोटयर्कवत्स्वांग तेजोव्याप्ततया स च ।
ज्योतिरूप इति प्रोक्तो दुर्ल्लक्ष्यावयवत्वतः ।।

निराधारं यतस्तेजो नैव कुत्रापि दृश्यते ।
अतस्तदंगाधारं तत्तेजो ब्रह्मेति कथ्यते ।।

अलिप्तत्वात् कर्मभिश्च देवासुरनरादिवत् ।
अक्रियः कथितः शास्त्रे सर्वकर्तापि स प्रभुः ।।

अयंभावः - अपरिणामित्वादरूपम्, मायिकाकारविरहित्वान्निराकारं, कोटिकोटर्यकवत्स्वांगतेजोव्याप्यत्वात् ज्योतीरूपम्, कर्मभिरलिप्तत्वादक्रियम् परमं तत्वमिति। चेत् निराकारमस्ति तर्हि कमाश्रित्य तिष्ठति तत्तेजः ? यतो न कुत्रापि

१ हरिवाक्यसुधासिन्धुः त. ६६ श्लो. १०-१५

निराधारं तेजो दृश्यतेऽत एव तदंगाधारं ब्रह्म तत्परश्च परमात्मा, स एव परमात्मा परमकारुणिकः अकारणकरुणावरुणालयो वा नृणां निःश्रेयसे विदधात्यलौकिकदिव्यवपुः, तस्मिन् धाम्नि मूर्तौ च नास्त्यणुरपि भेदः, यथा -

[1] अतो योऽस्त्यक्षरे धाम्नि गुणातीते हरिः स्वयम् ।
स एवास्त्यत्र प्रत्यक्षो नास्त्यल्यापि तयोर्भिदा ॥

मनुष्याकृतिरप्येष कृष्णो भवति निर्गुणः ।
अक्षरस्य इवेत्येव विज्ञेयः सूक्ष्मदर्शिभिः ॥

तथा च -

[2] स्वेच्छया न्राकृतेर्भूमौ चरतो राधिकापतेः ।
लौकिकानि च दिव्यानि चरित्राणि भवन्ति हि ॥

दिव्येषु तत्राभक्तानामप्याश्चर्यं भवेन्नृणाम् ।
लौकिकेषु च मानुष्यनिश्चयो मूढचेतसाम् ॥

भक्तस्य तु चरित्रेषु लौकिकेष्वपि सर्वदा ।
दिव्येष्विव भवेच्चित्रं न तु मानुष्यधीः क्वचित् ॥

तथा च -

[3] गुणातीतो निर्विकारो ज्ञेयः सर्वेश्वरेश्वरः ।
श्रेयार्थमेव जीवानां स्वेच्छया भाति मर्त्यवत् ॥

तस्मिन्नल्पधियो मूढाः आसुरीं प्रकृतिं श्रिताः ।
दृष्टांतेनात्मनो दोषान् निर्दोषे कल्पयन्ति हि ॥

---

१ हरिवाक्यसुधासिन्धुः त. २५४ श्लो. १९, २०
२ हरिवाक्यसुधासिन्धुः त. १४३ श्लो. ४९, ५३, ५४
३ हरिवाक्यसुधासिन्धुः त. २४ श्लो. २३, २४, २५, २७

दोषैस्तत्कल्पितैः कृष्णो दोषस्पृग्नैव जायते ।
प्रत्युत प्रविशन्त्येव कल्पकेष्वेव तेऽखिलाः ॥

अपि न्राकृतिमेनं ये विद्युर्निर्दोषमञ्जसा ।
सदोषा अपि ते तु स्युर्निदोषातत्प्रतापतः ॥

तथा च -

[1] भूरितेजसि यः प्रोक्तो भगवान् दिव्यविग्रहः ।
सोऽहमेव भवाम्यत्र स्थितो दिव्यनराकृतिः ॥

रामकृष्णादयो सर्वेऽवताराः संत्यतो हि मे ।
पुरुषोत्तमस्य वित्तेत्येतत् सत्यं ब्रवीमि वः ॥

अस्य व्याख्यानावसरे वैयाकरणाग्रगण्यः श्वेतायनव्यासः श्रीमत्कृष्णवल्लभाचार्यः ब्रह्मरसायानभाष्ये लिखति यत्- "अक्षरब्रह्मात्मक-प्राज्यतेजःपुञ्जे दिव्यमूर्तिः किशोर-आनन्दघनस्वरूपनरवेषो यो भगवानत्रवर्णितः स परब्रह्मपुरुषोत्तमः, सः परमेश्वरः सर्वेश्वरः स आत्माधिपतिः परमात्माः, सोऽक्षराधिपतिरक्षरातीतः, स सर्वशास्ता सर्वनियामकः, सः सर्वज्ञाता सर्वान्तरात्मा सर्वकर्मफलप्रदाता, सर्वान्वयिसर्वव्यतिरेकी सर्वान्तर्यामी सर्वशरीरी दिव्यसगुणसाकारः आनन्दैकतत्वघनमूर्तिः सधर्मकः सशक्तिकः सर्वावतारी सर्वव्यापकः सर्वञ्चालयिता सर्वात्मा परभगवान् यः सोऽसावहमत्र लोके भूतले भारते सौराष्ट्रे पाञ्चाले दुर्गपुरे स्थितो दिव्यनराकृतिरहमेव भवामि, आकृतिर्मूर्तिपारिमाण्डल्यम्, दिव्यत्वम्, अक्षरब्रह्मतोऽधिक द्योतमानरम-णीयौज्ज्वल्यम्, नरत्वं - नरति नृणाति वा नयति धाम च नरो ज्ञानी सलिंगमानवः दिव्यमानवकिशोरोऽखण्डितनरमूर्तिर्नारायण इति परनारायणोऽसंख्यनारायणां नारायणः स्वामिनारायणः सोऽहमत्र भवामि । एतत्प्रकारो यस्य भवेद् दृढाश्रयो भगवद्विषयकः स तु किञ्चिदपि विपरीतं कर्म, भगवदप्रसन्नताकरत्वं विपरीतत्वं, तथापि कदाचिदनिष्टदेशकालादियोगात् कुसंगयोगात् कुजना-वृत्तसंयोगवशात् करोति चेत् कर्म विपरीतं, मोक्षांगविरुद्धं जन्ममरणप्रदं तथापि

---

१ हरिवाक्यसुधासिन्धुः त. १४६ श्लो. ६२-६३

नैव पतति भगवद्दृढाश्रयमाहात्म्यज्ञानोपासनाबलमार्गात् कल्याणस्याध्वनः यतो नास्ति कश्चित्तादृशो मार्गो भगवतो दृढाश्रयादितरो यः पातयेत् तत्रायं पतेद्वा इयं वार्ता चेताऽवगंता स्यात्तस्य भवेदुदारातिशयमहदाशयः। रामकृष्णादय सर्वे इति - अहमवतारी परमात्माऽस्मीति सर्वेऽवतारा ममैव परपुरुषोत्तमस्य रामकृष्णादयः सन्ति, अवतार्यहं यथाविधा परिपूर्णोऽस्मि तथाविधात् किञ्चिन्मात्रं विशेषमात्रं वाल्पमात्रं वा बहुलमात्रं सर्वं निगूह्यावश्यकमात्रावतरणं कृतवानस्मि स्वयं वा स्वाश्रयेवाऽवतारितोऽस्मि यावदंशे न्यूनोऽवतारस्ततस्तावदंशेऽधिकोऽहमवतारीति शाश्वतं मेऽवतारित्वं विद्यते, अवतारत्वं त्ववतारत्वमेव, नह्यवतारत्वमवतारितत्वं भवति, सृष्टेः परिच्छिन्नसीमत्वात्, तत्र कार्याणां न्यूनवेषकृतिशक्यत्वात् सम्पूर्णोऽहं नावतरामि, अतो ममावतारा इति व्यपदेशः, अथ तर्हि भवान् कथमवतारीति चेत् , ब्रूवे, सर्वेऽवतारा मया मयि श्रीस्वामिनारायणस्वरूपेऽत्र आकृष्टा वासिताश्च नाणुमात्रमपि सर्वैश्वर्यादि न्यूनीकृतम्, ततोऽक्षरब्रह्मलोके योऽस्मि परिपूर्णोऽत्र, नावतारोऽहम् मूलमेवातार्यहम्, मयाऽपूर्वविधिरयमुक्तो "मामवतारिणं विद्यादि"ति, अक्षरधाममध्येऽपि स्थितोऽस्म्यहमत्रापि, स एवाहमहमेवः सः, सोऽयमयं सः, भवतां तु पात्रभेदान्मम दर्शनं पात्रानुकूलं सम्पद्यते रूपप्रतिरूपपन्यायेन भवतां मद्दर्शनं, अहं तु स एवास्मि, नाऽवतरितः अवतार्यस्मि अवतारोपचारस्तु - भवद्भिः क्रियते, मया तु "अवतार्यस्मीत्युच्यते, धामस्थोऽस्मीत्युच्यते, यत्राऽहं तत्र धाममध्यं धाममुक्ताश्च सन्ति भवन्त इत्युच्यते"।

प्रतिपादितविषयेऽस्मिन् प्रमाणान्यपि सन्ति यत्प्रथममेवोद्धृतान्यन्यान्यपि यथा -

[1] अक्षरे धाम्नि कृष्णस्य तद्भक्तानां च सर्वशः।
याः सन्त्याकृतयस्तास्तु सत्या दिव्याश्च भासुराः॥

पुरुषाकृतयः संति स च ते तत्र धामनि।
सच्चिदानंदरूपाश्च दिव्यांगवस्त्रभूषणाः॥

तैः सेवितोऽसौ विविधैः प्रेम्णा दिव्योपचारकैः।
परमानंददस्तेभ्य वर्तते तत्र सर्वदा॥

---

१ हरिवाक्यसुधासिन्धुः त. २६१ श्लो. ५-१०

एतादृशोऽयं कारुण्याज्जातोऽस्ति श्रेयसे नृणाम् ।
इह दृग्विषयः सेवां हरिर्वः स्वीकरत्यसौ ॥

रूपेऽस्यास्मिन्नक्षरस्थे मूले रूपे च किंचन ।
भेदो न सर्वथास्तीति जानीत निश्चितं हृदि ।

सर्वेषामक्षरादीनां नियन्ता चेश्वरेश्वरः ।
असावेकान्तभावेन भवद्भिः सेव्य आदरात् ॥

इत्याद्यनेकस्थलदर्शनाद् ज्ञायते यत् "अक्षरात्परतः परः" इत्यादिश्रुतिषु निगदितोऽयमेवाच्युत इति। भाष्यकाराणां मते - पुरुषोत्तमनिरूपणं हरिवाक्यसुधासिन्धौ हीदृग्प्रकारेणास्ति -

सर्वज्ञत्वसत्यसंकल्पत्वापाप्मत्वानादिबोधतत्त्वनिरतिशयानवधिकानन्द शक्तिमहीमशालित्ववान् परमात्मा, स्वाभिमतानुरूपाचिन्त्यनित्याद्भुत निरवद्यनिरतिशयौज्ज्वल्यसौगन्ध्यसौकुमार्यलावण्यसुकिशोरत्वासीमप्रकाशवत्व सत्यसंकल्पत्वादिमान् परमात्मा, अस्पृष्टमायिकादिशरीरनिष्ठसकलदोषकत्व दिव्यसौन्दर्यवान्, समस्तचेतनाचेतनशरीरको, जीवेश्वरप्रकृतिपुरुषकालाक्षर ब्रह्माद्यपेक्षस्वरूपस्वभावगुणविभूत्यद्वितीयः, सर्वोत्कृष्टः, समस्तनिगमसारगुह्यप्रकाशकः परमात्मा, परब्रह्म परमेश्वरः, परपुरुषोत्तमः, श्रीहरिकृष्णः, परममहाविष्णुः, परवासुदेवो, महानारायणः, नारायण मुनिरित्यादिनामभिःप्रद्योतितमहामहिमा, स्वोपासकसकलचेतनवृन्दानुष्ठित स्वाराधनानुरूपसञ्जातस्वकीयप्रसादसंपादितपुरुषार्थसमुदायकः, सर्वावतारी निरवधिकातिशयानन्दघनस्वरुपः, सुदिव्यकिशोरमूर्तिः, धर्मज्ञानवैराग्ययुक्तभक्तिलभ्यः, परमदयानिधिः, पूर्वपूर्वतमगुरुः, शरणागतसकल जनानुग्रहशीलो, ब्रह्मपुराधिवासोऽनन्त-कोट्यब्जार्बुदमुक्तसेवितचरणकमलो, जगदुद्भवस्थेमलयलीलः, सृज्यसमस्तवस्तुपूर्ववर्तिसत्वः, सार्वज्ञाऽसीमतृप्तनादिबोधस्वातन्त्र्यनित्यप्रत्यक्षदर्श्यनन्तशक्त्यादिमान्, नित्यापरोक्षानपेक्षितसाधननिर्दोषज्ञानगोचरसकलवस्तुकः, सकलबद्धचेतनबहुविधकर्मफलभोगानुकूलदेवमनुष्यपश्वादितनुनिर्माणोपायसामग्री विशेषज्ञः,स्वोपासकसकलमुक्तचेतनस्वपरिचर्यानुरुपः,भागवतीमूर्तिसम्पादन चतुरोनिरस्तसमस्तोपप्लवकलंकनिरतिशयानन्दपरिपूर्णो,निजानन्दभोगरसिकः, पावनपुरुषविध-आत्मतन्त्रो, निश्चेतनात्मकतनुगुणाऽस्पृष्ट-आनन्दमात्रकरणपादमुखोदरादिः,केवलानुभवानन्दसर्वधीदृक्स्वरूपानन्दानुभवाऽनादिसिद्धज्ञानी-

शान्तिस्मृद्धोऽन्यप्रेष्यताकार्पण्यरहितः, स्ववशीकृतस्वेतरसकलवस्तुकश्चेतनवस्तुप्रेरकस्त्रैकालिकज्ञानात्मकद्रष्टिमान्, संकुचितविकसितान्तर्यामिशक्तिमान्, यथार्हकर्मफलप्रदानप्रभुरपरिमेयसामर्थ्यवान्,अपरिमेयभगवानखिलशक्त्यवबोधकः, सृष्टिसमवायिहेतुर्दिव्याऽप्राकृताऽविभूतिकपुरुषाकारसुमूर्तौ बृहत्वादिसकलमहत्ताविशिष्टो, विश्वप्रवेशनशीलः, सर्वोपादानकारणात्मको, नामरुपविभागानर्हचेतनाचेतनवस्तुतनुको, निरुपाधिकपरमानन्दभूमिकः, शरणागतसकलजनानेकविधपीडाहारकोऽनवधिकातिशयानन्दोत्पादभूमिकः, सर्वान्तरात्मा, जीवेश्वराक्षरब्रह्मश्रेष्ठतमः, समस्तकल्याणैकतानपरः, सर्वमंगलाधारः, सकलनिमित्तहेतुः, स्थूलसूक्ष्मसकल चिदचिद्विशिष्टपरब्रह्मदिव्यमनोहरमूर्तिर्वेदान्तशास्त्रैकगम्यो, निमित्तोपादान शक्तिकोऽवाप्तसमस्तकामः, स्वप्रकाशरूपान्तर्यामिशक्तिमान्, सकलवेदोद्भाव यिताऽनादिसिद्धदिव्यपुरुषकारो, मुमुक्षुपरमप्राप्यः, सच्छब्दवाच्यः, आनन्दमयः, सौषुप्तजीवनिवेशाश्रयोऽन्नमयादिकोशकञ्चुकान्तरनिगूढो, नमनीयभंजनीय ध्येयोपास्यप्रसाद्यप्रेमास्पदवरणीयः, संकल्पानुरूपबहुभवनसमर्थ, आनन्दघनरसमयः, सर्वलोककामेश्वरः, परमकारुण्यसौशील्यवात्सल्यौदार्यानादिबोध, आकाशवन्निर्लेपाऽन्तर्वर्ती जीवनप्राणः, निखिलभूवननायकः, निरस्तसमस्तदोषवासनाकलंकः, सर्वज्योतिः प्रदः, सकलकल्याणैकतानोऽपहतपाप्मत्वाद्यष्टगुणः, सर्वज्ञत्वादिषड्गुणो, मनोमयः शोचाद्यनन्तगुणाः,सर्वकर्मा, सर्वकामः, सर्वगन्धः, सर्वरसः, समस्तेतरवस्तुविलक्षणो, दिव्यभोग्यभोगोपकरणो, जनकल्याणकरवाणी युतोऽणुमहत्तमऐकान्तिकमुक्तंप्राप्यप्रसेव्यः, स्वमहिमप्रतिष्ठितोऽक्षरातीतः, सर्वकारणकारणं, सर्वधामाधिपतिर्व्यापकोऽतिकमनीय, आश्रित जनवात्सल्यौदार्यगुणगरिष्टो, हृदयदहरात्मनिविष्ट-उपासितदेवादिप्रतीको, विधिनिषेधाभिप्रायवान्, त्रिगुणातीतपरमानन्ददायकः, सच्चिदानंदस्वरुपः, सर्वचेतनाऽचेतनविलक्षणः, समस्तदोषकलंकवर्जितः, परमकारुणिको, रूपानुरूपप्रतिरूपः, स्वाभिमतानुरूपैकस्वरूपो, निर्दोषनिखिलदिव्यमनोहरमूर्तिः, कारणावस्थसूक्ष्मचिदचिच्छरीरी, कार्यावस्थस्थूलचिदचिच्छरीरी, सर्वावस्थावस्थित चिदचिदात्मकप्रपञ्चानुप्रविष्टो, दिव्यमुक्तोपास्यमानाऽनवरतचरणकमलः, करणाधिपाधिपः, सर्वपतिः, सर्वस्वामी, पुरातनपुरुषो, नित्यतृप्तः, स्वप्नसृष्टि प्राविर्भावकः, सर्वगतः, सर्वयज्ञाराध्यः, सर्वकर्माराध्यः, सर्वविद्याराध्यः, ध्यानसमाधिरूपोपासनगम्यो, भक्तानुग्राहक, ऐकान्तिक भक्तमुक्तयोग्यरसरूपमूर्तिः परमात्मा । इति दिक् ...

## परब्रह्म-ब्रह्म-ईश्वराणां व्यावर्तका धर्मा:

भारतीयसंस्कृतौ परमप्रमाणत्वेन स्वीकृतासु उपनिषत्सु ब्रह्मशब्देन परब्रह्मण: ब्रह्मणो वा प्रतिपादनं भवति, तत्र कुत्रचित् ब्रह्मपरब्रह्मणोर्भेद: न स्पष्टतया प्रतीयते, औद्धवीयेषु ब्रह्मशब्दाक्षरवाचीत्वेन प्रसिद्ध:, अध्यात्मज्ञाने ब्रह्मपरब्रह्मणोर्भेदविषये सुस्पष्टचर्चा भगवता यादृशी कृता न तादृशी केनापि, सर्वतो परेऽक्षरे पुरुषोत्तम:, अक्षर: नित्यसिद्धमुक्ताश्च निवसन्ति, सर्वेषामाकृतय: पुरूषोत्तमसदृशा एव ,सारूप्यमुक्ते: सद्भावात्, तथाप्यतिशयेन तारतम्यं तद्यथा - तेजोविग्रहतासाम्याच्चन्द्रताराश्च यद्यपि तुल्या इव प्रतिभाँति तथापि तारामण्डलत: चन्द्रमण्डलं महत् वर्तते, उडुगणा: सर्वेऽसंख्याता अथापि न तम निवारणे शक्ता:, कृष्ण: परात्परपूर्णपुरुषोत्तमनारायण: सर्वनियन्ता सर्वकृत् सर्वकारणञ्चास्ति, कर्तुमकर्तुमन्यथाकर्तुमपि समर्थोऽयं प्रभु: स्वतेजसि सर्वानेतान्विलाप्यैकैव स्थातुमपि क्षम:, यथा चोक्तं -

[१] स्वावासमक्षरमपि प्रत्याकृष्यात्मनि स्वयम् ।
निजशक्त्यैव तान् धर्तुं स्वतन्त्र: क्षमतेऽखिलान् ।

एवं भूतेन हरिणा साम्यं जानन्ति येऽधिय: ।
अक्षरस्य च मुक्तानां ते त्वज्ञा: पापरूपिण: ।।

ईश्वरत्वं महत्वं च यत्रान्येषामुदीरीतम् ।
तत्रास्यैवान्वयेनैव तत्प्रोक्तमिति दृश्यताम् ।।

कायार्थं यत्र यत्रास्यानुप्रवेशोऽस्ति च प्रभो: ।
स स प्रोक्तोऽस्ति भगवानिति नैव स्वत: क्वचित् ।।

तं विना त्वक्षरस्यापि भगवत्वं न विद्यते ।
कुतस्तरां विरिंचादे: सनकादे: कुतस्तमाम् ।।

एकएवास्ति भगवान् कृष्णो नान्यस्तु तत्सम:।
न कोऽपि तत्त्वमाप्नोति महद्भिरपि साधनै: ।।

---

१ श्रीहरिवाक्यसुधासिन्धु: त. १२१ श्लो. ३४, ३६, ३७, ३८, ३९, ४१

अयंभावः - अक्षरब्रह्मलोके राज्ञः सेवकानां यथाऽत्र गौरवागौरवाभ्यां नियामकत्व-नियाम्यत्वाभ्यां भेदस्तथा भगवतस्तद्भक्तानां सर्वप्रकाशकत्वेन सर्वाप्रकाशकत्वेन च भेदः, मुक्तोऽपि भगवान्निवासेन भगवत्तादात्म्येन तु जगज्जीवानां प्रकाशकत्वे समर्थो भवति परंतु नाक्षरं प्रकाशकत्वे स प्रभवति, भगवांस्तु - अक्षरादिपर्यन्तान् सर्वान् स्वतन्त्रतया धारयितुं समर्थो, मुक्तास्तु न तथा किन्त्वक्षराधारा इति भेद एश्वर्येणापि। (अनेनाभेदमुक्तिर्नेति इति प्रतिपादितम्) तथा च भगवानक्षरपर्यन्तानां सर्वेषां शरीरी, अक्षरपर्यन्ताः सर्वेऽपि तेषां शरीराण्येव। न च वाच्यमत्र यत् आत्माक्षरयोः विकारविरहित्वं, हेयोपाधित्वं मायाविरहित्वञ्च परमात्मवदेव श्रुयतेऽतः नात्र देहदेहिनोः सर्वथा वैलक्षण्यमिति, अत्र वैलत्रण्यं प्रतिपादयन्नाह भगवान् -

[१] **शरीरता तयोः कृष्णव्याप्याधीनत्व धर्मतः ।**
**व्याप्यत्वं परतन्त्रत्वं शारीरो धर्म उच्यते ।।**

**शरीर्यपेक्षया च स्यादसमर्थं शरीरकम् ।**
**साधयेत्सर्वमेवापि शरीरी तु निजेप्सितम् ।।**

**मूर्तिमान् भगवान् कृष्णः सर्वेषामपि चात्मनाम् ।**
**तद्व्याप्यदृश्यदेहानामप्यस्त्यात्मतया स्थितः ।।"**

अत्र शरीरलक्षणं विचारणीयम् - केचित् "यद्भोगायतनं तच्छरीरमिति "प्रतिपादयन्ति, तदयुक्तम्, भोगायतनेषु वेश्मादिषु शरीरत्वाप्रसिद्धेः। "यदिच्छाधीनस्वरूपस्थितिप्रवृत्ति यत् तत् तस्य शरीरमिति" तदप्यशुद्धम्, रुग्णशरीरस्य तदिच्छाधीनप्रवृत्तित्वाभावात्, मृतशरीरस्यतदायत्तस्थितित्वा भावाच्च, एवमेव - प्रवेशार्हं शरीरम्, सञ्चाल्यं शरीरम्, तदंशत्वं शरीरम्, तदुपयोगार्हमित्यादीनि शरीरलक्षणानि न युक्तानि, तत्तत्दोषसम्पृक्तत्वात्, सुचारुशरीरलक्षणमाह श्रीभाष्ये श्रीमद्रामानुजाचार्यः - [२] "न तु द्रष्टान्तभावात्" इति सूत्रस्य व्याख्यानावसरे "यस्य चेतनस्य यद् द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं च तत् तस्य शरीरमितिशरीरलक्षणमास्थेयम्। तदनुसारेणैवात्र भगवान् सर्वेषां शरीरत्वं त्रिधा प्रतिपादयति – व्याप्यत्वात्,

१ श्रीहरिवाक्यसुधासिन्धुः त. ६४ श्लो. १०, ११, १२
२ ब्रह्ममीमांसा २/१/९

आधीनत्वात्, असमर्थत्वाच्च। यद् व्याप्यं तदतिरिक्ताऽवृत्ति तदनधिकरणाऽवृत्ति तदधिकरणवृत्ति तद्व्याप्यम्, तदिच्छातिरिक्तेच्छाननुसृतत्वं तदिच्छानुसृतत्वं तदधीनत्वं, तच्छक्त्यतिरिक्तशक्त्यविषयत्वं तच्छक्तिविषयत्वं तदसमर्थत्वम् - एतदनुसारेण भौतिके शरीरे चेतनः शरीरी, ब्रह्माण्डेषु वैराजः शरीरी, वैराजादिषु महाविष्णुः शरीरी, महाविष्णौ प्रधानपुरुषः सर्वतत्वानां शरीरी, प्रधानपुरुषाणां प्रकृतिपुरुषः शरीरी, मुक्तानां प्रकृतिपुरुषप्रधानपुरुषमहाविष्णवादीनां तु साक्षादक्षरब्रह्मशरीरी, अक्षरब्रह्मणः श्रीपुरुषोत्तमः शरीरीति। तथा च -

**[१] सर्वकारणता सर्वाधारता ब्रह्मणोऽस्ति हि ।**
**पृथग्नामधेयमाधारात्तिष्ठेत्कार्यं च कारणात् ॥**

इत्यादिना व्याप्यत्वमुक्त्वा -

**[२] जीवेश्वराणां सर्वेषां जीवनं च स एव हि ।**
**तं विना ते न वै किञ्चित्कर्तुं भोक्तुं तथेशते ॥**

इत्यादिना तदधीनत्वमसमर्थत्वञ्चापि प्रतिपादितम्, एवं प्रकारेण परब्रह्म- ब्रह्म- ईश्वराणां भिन्नत्वमेवोचितमिति ।

## परब्रह्मप्राप्तेः हरिवाक्यसुधासिन्ध्वनुसारेण साधनानि ।

श्रीमद्श्रीहरिवाक्यसुधासिन्धौ भिन्नभिन्नतरंगेषु परब्रह्मप्राप्तेः धर्मज्ञानवैराग्यभक्त्याख्यानि चत्वार्यभिहितानि मुख्यसाधनानि । इमे चत्वारः गुणरूपेण यस्मिन् परिपूर्णरूपेण विराजन्ते स उत यस्य प्रधानभावेनैकस्मिन्वर्तमानेऽपरे त्रयः अंगभावेन वर्तेरन् सोऽपि भागवतेष्वेकान्तिक इत्यभिधीयते, तस्यैकान्तिकस्यैव परब्रह्मसान्निध्यसम्पृक्तता नान्यस्य। भगवद्भक्तेषु चतुर्णामपि गुणानामवश्यभावित्वं प्रतिपादयन्नाह भगवान् स्वामिनारायणः । तथाहि -

---

१ श्रीहरिवाक्यसुधासिन्धुः त. १३६ श्लो. ३३
२ श्रीहरिवाक्यसुधासिन्धुः त. २६० श्लो. १९

[१]भक्ता ऐकान्तिका येऽत्र, सन्ति कृष्णस्य विश्रुताः ।
भवेयुस्तेषु चत्वारः सर्वथैव गुणा इमे ॥

धर्मज्ञानं च वैराग्यं भक्तिश्चेत्यतिदुर्लभाः ।
अंगप्रधानभावेन भवेत्तेषां तु वर्तनम् ॥

तथा चैतादृशभक्तानामेव निश्चयपरिपूर्णत्वमुक्तम् यथा -

[२] स्वधर्मज्ञानवैराग्यभक्तिभिः सहितो हरेः ।
नराकृतेर्निश्चयो यः परिपूर्णः स उच्यते ॥

एतादृक्भक्तानां कृते एव मोक्षद्वारं विवृतं भवति इत्यपि प्रतिपादितम् । तथाहि -

[३] दृढं स्वधर्मं वैराग्यं ज्ञानं स्वात्मपरात्मनः ।
माहात्म्यज्ञानसहितां कृष्णभक्तिं च ते दृढाम् ॥

संश्रिताः सर्वभावेन, तेषां स्युः सततं मुने ।
कृष्णार्था एव सकला बाह्यान्तःकरणक्रियाः ॥

विवृतं तत्प्रसंगेन मोक्षद्वारं भवेदिति ।

तद्विरहिणामधमत्वमपि कण्ठतो प्रतिपादितं यथा -

[४]रंकत्वं धर्महीनत्वं भक्तिहीना दरिद्रता ।
ज्ञानहीनं च कालुष्यं नैवेष्टव्यं हि सर्वथा ॥

१ श्रीहरिवाक्यसुधासिन्धुः त. ४७ श्लो. ४, ५
२ श्रीहरिवाक्यसुधासिन्धुः त. ७५ श्लो. १६
३ श्रीहरिवाक्यसुधासिन्धुः त. ५४ श्लो. ९, १०, ११
४ श्रीहरिवाक्यसुधासिन्धुब्रह्मरसायनभाष्ये ३७ तमे तरंगे

अतोऽत्रौद्धवीयेष्यतिप्रसिद्धतमस्य धर्मस्य तावत्प्राथम्येन निरुपणं क्रियते-

## धर्मनिष्ठा

श्रीमद्हरिवाक्यसुधासिन्धौ धर्मतत्त्वस्य निरूपणं तत्र तत्र व्यवस्थितरूपेण प्रतिपादितमस्ति, को वा धर्म: ? धर्मशब्देनात्र भागवतधर्मो निष्कामधर्म: सेवाधर्मो भगवत्प्रसन्नात्मको धर्म:। धर्मोऽत्र मुक्तिसाधनं भक्त्यर्थकक्रियाकलाप:। साधनपद्भाक् पुण्यात्मकधर्मस्य तु स्वर्गादिप्रदत्वेन सुखकारित्वं श्रवणेन च (केवलेन हि धर्मेण न त्रैलोक्याद् बहिर्गति:) साक्षान्मुक्तिसम्पादक साधनत्वेनाऽपरिगणनात् । तथापि "धर्मेण रहिता भक्तिर्न कर्तव्यात्र मामकै:" इत्यनुशासनात्। तथा च -

**[1] ऋते धर्माच्चात्मनिष्ठाभक्त्यरागौ न सिद्ध्यत: ।**

इत्यादिस्थलेषु धर्मस्यावश्यकता प्रदर्शनात् धर्मस्यापि श्रेष्ठत्वमस्त्येव, तथाविधधर्मस्य या निष्ठा सा धर्मनिष्ठा, कथं सा उदियादिति जिज्ञासायां -

**[2] मन्वादिभि: प्रणीतानां श्रुतीनां श्रवणान्नृणाम् ।**
**उदियाद्धर्मनिष्ठा भयं स्यात् पापकर्मण: ॥"**

धर्मप्रतिपादकमनुयाज्ञवल्क्यपराशरशंखलिखितादिकृतैकविंशतिस्मृतीनां श्रवणेन सत्संगिजीवानादिधर्मशास्त्राणां श्रवणेन वा योदेति सा धर्मनिष्ठा। भगवन्मुखोल्लासदर्शनोत्सुकानां भक्तानां धर्मनिष्ठा स्वाभाविकी धर्मस्य परंब्रह्माभिमतरूपवत्वात्। स: श्रीहरिप्रसक्तचित्त: विचारयति यत् - भगवत्कृत धर्ममर्यादाभंगेन न ममोपरि तस्य स्नेहो स्थाष्यतीति, कीदृग्भवेत्स धर्मनिष्ठा युक्तो भक्त: ?

**[3] निर्दम्भ: परिचर्यैव कृष्णस्य च तदात्मनाम् ।**
**भक्तानामिति तद्धर्मो जाति धर्मेण संयुता ॥**

१ श्रीहरिवाक्यसुधासिन्धु: त. १९ श्लो. ९
२ श्रीहरिवाक्यसुधासिन्धु: त. १७७ श्लो. ६
३ श्रीहरिवाक्यसुधासिन्धु: त. ४७ श्लो. ८ - १२

शास्त्रे भक्तस्तत्प्रधानो धर्मनिष्ठ इतीर्यते ।
कृष्णतद्भक्तसेवायां स्याद् रतोऽसौ यथोचितम् ॥

कृष्णमन्दिरवाट्यादिनिर्माणेऽत्र रूचिर्भवेत् ।
नैवेद्याय च कृष्णस्य नानाभोज्यप्रसाधने ॥

कृष्णस्य च सतां वासे, लेपसम्मार्जनादिषु ।
रुचिः स्यात् कृष्णभक्तानां पादसंवाहनेऽस्य च ॥

श्रुतिकीर्त्यर्चनादीनि कुर्यान्निश्छद्म स प्रभोः ।
तस्य शास्त्रे भागवतधर्माढयेऽतिरूचिर्भवत् ॥

दम्भः - स्वार्थसाधनार्थं कुटिलता, तद्रहितत्वं निर्दम्भत्वं। निष्कपटभावेन भगवतस्तदवतारणां तदंशजनानां तदात्मनिवेदिनां सुभक्तिमतां भक्तानां च श्री हरिकृष्णस्वरूपैकमानासानां सत्पुरुषाणां च श्रेष्ठा परिचर्या समन्ततः कर्मकाण्डेन सेवनं - जातिधर्मानुकूलं सेवनं, सर्वमपि शरीरमानसधर्मान्वितमेव भवति नान्यथा, अथवा भगवद्गुणकथाश्रवणनामसंकीर्तनसुगन्धसमर्चनप्रभृतीनिव्यजन चामरप्रदोलनमहाप्रदीपप्रकाशनदोलाप्रदोलनपर्यंकप्रस्वापनसिंहासनासनयानवाहन रक्षणाभूषणवस्त्रालंकारोपस्थापनादिपादुकासंरक्षणादिकार्यसुरूचिमत्वं निश्छद्म सेवनं धर्मप्रधानजनस्यलक्षणम्। भगवद्सम्बन्धवन्तो ये ये धर्माचरणा यत्र यत्र शास्त्रे महोत्सवा वार्षिकाद्या उत्सवा महाः क्रीडोत्सवा वर्णिताः, सेवाविधयो वर्णिताश्च तादृशे धर्मकाण्डप्रधाने शास्त्रेऽपि तत्क्रियोत्सवानुष्ठानशिक्षणार्थं रूचिमत्वं धर्मप्रधानजनस्य लक्षणम् ।

## ज्ञाननिष्ठा

"ऋते ज्ञानान्नमुक्तिः" "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन" "सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यति" इत्यादि श्रुतिस्मृतिप्रतिपादितज्ञानस्य या निष्ठा सा ज्ञाननिष्ठा। कथमुदेति सा ? इति जिज्ञासायाम् -

---

[१] बृहदारण्यमुख्यानां तथोपनिषदां श्रुतेः ।
गीताशारीरकादेश्च ज्ञाननिष्ठोदयो भवेत् ॥

श्रुतिब्रह्मसूत्रगीतादीनां श्रवणेन गोलोकवैकुण्ठश्वेतद्वीपाऽव्याकृताऽमृत ब्रह्मपुरादि धाम्नां स्थितिस्वरूपादिसमाकर्णनेन च विश्वजनीनभगवल्लीलानां समहात्म्यकं श्रवनेन भगवदवतारकथानां श्रवणेन च ज्ञानमुत्पद्यते। तथाऽऽत्मज्ञानेन सह परमात्ममाहत्म्यमपि संभवेत्, तथाविधस्य ज्ञानवतो भक्तस्य लक्षण्यान्याहुः भगवान यथा -

[२] स हि सन्मात्ररूपेण वर्तेताऽजस्त्रमात्मना ।
कृष्णं चेयात्सर्वपरं निर्दोषं दिव्यविग्रहम् ॥

वार्तां तदाश्रयां कुर्यात् तच्छास्त्रे चानुरागवान् ।
सन्मात्रवृत्तिविक्षेपासहिष्णुप्रकृतिश्च सः ॥

अयं भावः - आत्मपरमात्मशुद्धताप्रतिपादके - तत्तत्तत्वविवेचके शास्त्रे, माहात्म्यज्ञानविवेचके शास्त्रे, विवेकप्रदे शास्त्रे, सूक्ष्मचेतनतत्त्वपरायणे शास्त्रे, भगवत्तद्धामतन्मुक्ततल्लीलाचमत्कारसिद्धितद्भक्तसमज्ञप्त्यादिबहुले शास्त्रे, शास्त्रज्ञाने, ज्ञानशास्त्रे, विशेषतोऽनुरागवान् - प्रीतिमान् भवेत् । सत्तमात्रज्ञातृ ज्ञानप्रधानवर्तने ये ये विक्षेपाः केवलमन्दिरमहोलवाटिकानिर्माणादयस्तत्र तत्र स्वमतेन मानितेषु विक्षेपेषु सेवात्मकेष्वविक्षेपेष्वपि सहनशक्तिरहितप्रकृतिमान्। स्थूलसेवाक्रियासु तितिक्षाशून्यो भवेदिति । ज्ञानानुकूलप्रयत्नव्यवहारादिमत्वं ज्ञाननिष्ठाप्रधानत्वं बोध्यम् । लोहनगरस्य प्रथमतरंगे भजनानन्दस्वामिनः पृष्टे सति ज्ञानिनः त्रैविध्यं प्रदर्शितं तत्तल्लक्ष्मैः, यथा न्राकृतेः कृष्णस्यातिमानुषम् प्रतापं वीक्ष्य, "अयं साक्षाद्धरि" इति मत्वा य आश्रयेत् परंतु क्वचिद् भगवतः नृनाटम् दृष्टवा, दृष्ट्वा च प्रतापाऽनाविष्करणं शंकेत स कनीयज्ञानवान्। नरतनुं प्रभुं कनीयोवत् विदित्वापि तस्यातिशुभचरित्राणि वीक्ष्य (अर्धक्षौरेर्भोजनं, कंकगृहेभोजनमन्त्यजगृहे रात्रिशयनं चेत्यादीनि वीक्ष्याधर्मं कल्पयित्वा) मुह्यति, अर्थात् मनुष्येभ्य अप्यकृष्टचरित्रदर्शनजन्यसंशयवान् मध्यमः। उत्तमस्तु

---

१ श्रीहरिवाक्यसुधासिन्धुः त. ११७ श्लो. ७
२ श्रीहरिवाक्यसुधासिन्धुः त. ४७ श्लो. १४, १५

पर्वतवन्निश्चलः कृष्णस्य सर्वकर्मसु कर्हिचिदपि नैव मुह्येत्। त्रयाणामपि प्राप्ति विषये भेदाः -

[१] प्राप्नुयादुत्तमः सिद्धिमस्मिन्नेव हि जन्मनि ।
मध्यमो जन्मभिर्द्वित्रैरनैकैस्तु तृतीयकः ॥

तथा च - ५२तमे तरंगे ज्ञानीभक्तस्य निरूपणं कुर्वन्नाह - सांख्ययोगपाञ्चरात्रवेदान्तात्मकैः शास्त्रैश्चर्तुभिरेव कृष्णस्वरूपस्य समयग्बोधो जायते। "अनेनोद्धवीयानां कृते सांख्ययोगपाञ्चरात्रवेदान्तात्मकानि सच्छास्त्राणि एव ज्ञानप्रदानि, तस्य ज्ञाता एव ज्ञानवान् वा इति प्रतिपादयति, शास्त्रैणैकेन ज्ञाने तुं या न्यूनता भवेत् सा शास्त्रान्तरैः नश्येत् । पूर्णं ज्ञानं च सिद्ध्यति। यथा सांख्यशास्त्रस्य ज्ञानमात्रेण न सम्यग्ज्ञानं भवितुमर्हति यतो तत्र चतुर्विंशतितत्वानां निरूपणानन्तरं पञ्चविंशो जीव एव पुरुषः प्रतिपादितः परंतु न परमात्मतः जीवात्मा पृथगुक्तः । योगशास्त्रे मूर्तिमान् कृष्णः षड्विंशो निरूपितोऽस्ति (चतुर्विंशतितत्वानि + जीवाः + परमात्मा च) तं परिच्छिन्नत्वेन एव जानाति केवलयोगशास्त्रज्ञाता, न तु सर्वान्तर्यामित्वेन व्यापकम् । केवलेन वेदान्तशास्त्रेणापि परिपूर्णता न स्यात् यतो तत्र भगवान् सर्वकारणत्वेन सर्वव्यापकत्वेन निर्गुणत्वेन वा प्रतिपादितः, तं निराकारमेव जानाति केवलवेदान्तशास्त्रज्ञाता , परंतु तस्य कृष्णस्य प्राकृतेन्द्रियहीनताम्, मायागुणैर्हीनताम्, कल्याणगुणशालिताम्, दिव्यविग्रहतां वा न स जानाति । तथा न केवलेन पञ्चरात्रेण चैकेन सम्यग्ज्ञानं जायते यतो साकारस्य कृष्णस्यावतारास्तत्र कीर्तिताः ततः प्रायशो तेषूपासकानामेकदेशस्थाधीः मनुष्यभावापत्तिश्च जायते । परंतु भगवतः सर्वान्तर्यामितां सर्वथा बोद्धुं न ते शक्तुवन्ति । अत एव -

[२]शास्त्रैश्चतुर्भिरेवातः सम्यग्बोधस्तु जायते ।
नृणां कृष्णस्वरूपस्य भक्तानां धीमतामिह ॥

एकपादं भवेज्ज्ञानं शास्त्रेणैकेन च प्रभोः ।
द्वाभ्यां द्विपादं भक्तस्य त्रिपादं च त्रिभिर्ध्रुवम् ॥

---

१ श्रीहरिवाक्यसुधासिन्धुः त. १०९ श्लो. २९
२ श्रीहरिवाक्यसुधासिन्धुः त. ५२ श्लो. २५, २७

पूर्णं ज्ञानं चतुर्भिः स्यादतः शास्त्रत साधुतः ।
सम्यगेवावगन्तव्यश्चतुः शास्त्रार्थ आदरात् ।।"

## वैराग्यनिष्ठा

[१] कृष्णेतरपदार्थेषु, सर्वत्रैवारुचिः सदा ।
यस्यमुख्या स वैराग्यनिष्ठो भक्तः प्रकीर्त्यते ।

मलवत्त्यक्तगेहादेर्विस्मृतिस्तस्य सर्वदा ।
स्याच्च स त्यागिनामेव संगं कुर्याद्धरातले ।।

श्रीहरिकृष्णभगवत्तद्भक्तेतरपदार्थारुचिकत्वं वैराग्यप्रधानभक्तस्य लक्षणम्। चतुर्विधप्रलयानां विचारमात्रेणैव वैराग्यस्योत्पत्तिर्जायते, सर्वेषां साहजिको स्वभावः यत् यत्र दुःखं तत्र रागराहित्यं, यस्य विनाशो विलयो वा समीपवर्ती ज्ञातस्तत्र रागो ह्रासं याति विरागो वर्धते । यत्र मरणस्य त्रासो भयं वा तत्र विरागः यत्र नित्यप्रलयज्ञानं तत्र नित्यविरागः । यत्र नैमित्तिकप्रलयज्ञानं तत्र नैमित्तिको विरागः , यत्र प्राकृतप्रलयज्ञानं तत्र प्राकृतिकविरागः , यत्रात्यांतिक प्रलयज्ञानं तत्रात्यांतिक विरागश्चेति। त्यक्तं स्वमलं प्रति नाऽऽदरः कस्यचिद्देहिनः। अनादरेण रागाभावः सिद्धयति । पक्षिकीटादीनामपि रीतिरियम्, तत्र मले तस्य तस्यातिनिकृष्टताभानात् । तस्य मलस्य निदर्शनं त्यागदाढर्याय युज्यते । त्यक्तमलं ग्राह्यत्वेन न कश्चिदपि स्मरति तथा परित्यक्त ममताश्रयगृहक्षेत्रकलत्रपुत्रादेर्ग्राह्यत्वेन पुनः स्मरणं न भवेद्यस्य तस्य वैराग्यं प्रधानं बोध्यम् । स वैराग्यप्रधानो भक्तो वैराग्यप्रधानत्यागिजनानामेवाधिकसंगं - समागमं कुर्यात् । श्रीहरिकृष्ण - भगवतो भक्तिमपि त्यागाविरोधिनीमेवाचरेत् । भगॅवत्प्रतिमास्नापनादिकमपि मृत्काष्ठाऽऽलाबूपात्रैस्तन्नैवेद्यं च पत्रपुष्पफलादिभिः कुर्यादित्येवं त्यागमयीं भक्तिं कुर्यात् । त्यागस्य वैराग्यस्य वा प्रथमप्रकरणस्य द्वितीये तरंगे भेदाः वर्णिताः । तद् यथा -

---

[१] श्रीहरिवाक्यसुधासिन्धुः त. ४७ श्लो. १७, १८

[१] औदासीन्यं हृदि सदा शब्दादि विषयेषु यत् ।
रमणीयेष्वपि भवेदुत्तमः स प्रकीर्तितः ।।

प्रारब्धकर्मलब्धास्तान् भुंजानोप्याज्ञया प्रभोः ।
अनासक्तो जनकवत्भवेत्तेष्वेव उत्तमः ।।

व्यावहारिककार्याणि साक्षाद् दृष्टफलान्यपि ।
आक्रष्टुं तन्मनः क्वापि, शक्नुवन्ति न सर्वथा ।।

निरंतरं दोषदर्शी शत्रुवद् विषयेषु सः ।
देशकालादिवैषम्येऽप्यवाप्नोति न विक्रियाम् ।।

सच्छास्त्रसाधुभगवत्सेवासु निरतः सदा ।
कामाद्यलुप्त विज्ञानो ज्ञेयोऽसौ लक्षणैरिति ।।

अरुच्यार्थेषु रम्येषु समः पूर्वेण मध्यमः ।
किन्तु देशादि वैषम्ये न स्थिरास्य स्थितिर्भवेत् ।।

ज्ञेयः कनीयो वैराग्यः सामान्यर्थेषु सर्वथा ।
न रुचि रुचिरार्थेषु, सा यद्धृदि भवेदिति ।।

भगवति परस्मिन् ब्रह्मणि, अक्षरे ब्रह्मणि, मुक्तब्रह्मसु, अवतारेषु गुणविभूत्यैश्वर्यसामर्थ्यसेवादिव्यरूपानुरूपितादिषु च रुचिर्मोक्षांगतया भक्तिरूपतापन्ना रतिरूपाप्रीतिर्न क्षुद्ररागात्मिका किन्तु दिव्या सा । विधानविषया वैराग्यरूपा सा वैराग्य विपरीता न । या तु भगवदितरेषु मायिकेषु रुचिः सा विपरीता बन्धकर्त्री । अरुचिर्न वैराग्यं भगवदरुचेस्तथात्वापत्तेः । इतराऽरुचि र्वैराग्यम्, आत्माक्षरधामाद्यरुचेस्तथात्वापत्तेः । भगवत्तच्छेषस्य विशेष दिव्यतारुचिग्रहणार्थं नञर्थद्वयसमावेशः, भगवदनुकूलारतिरेव पारिभाषिकी रुचिर्वैराग्यम्, भगवत्प्रतिकूला रतिः, रुचिः रागोऽवैराग्यमिति ।

---

१ श्रीहरिवाक्यसुधासिन्धुः त. २ श्लो.५- ११

## भक्तिनिष्ठा

भजधातोस्तुसेवार्थः, प्रेमेक्तिन् प्रत्ययस्य च।
स्नेहेन भगवत्सेवा भक्तिरित्युच्यते बुधैः।।

मयिचानन्ययोगेन, भक्तिरव्यभिचारिणि।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामिनचिरात्पार्थमय्यावेशितचेतसाम् ।।

भक्त्या त्वनन्यया पार्थ

सकलभुवनमध्ये निर्धनास्तेऽपि धन्याः,
निवसति हृदि येषां श्रीहरेर्भक्तिरेका।

त्वयाहुतस्तु भगवान्याति नीचगृहेष्वपि।

क्रियावानेष ब्रह्मविदां वरिष्ठः।

इत्यादिभिः श्रुतिस्मृतिप्रतिपादिता या भक्तिः तस्याः निष्ठा सा भक्तिनिष्ठा । प्रधानेयं सर्वेषु मुक्तिसाधनेषु । भगवति परमस्नेहस्वरुपा । यथोक्तं भगवता स्वामिनारायणेन "माहात्म्यज्ञानयुग्भूरिस्नेहोभक्तिश्च माधवे" इति । तथा च नारदभक्तिसूत्रे "सा त्वस्मिन् परम् प्रेमस्वरूपा" इति च । तथाहि-

[१] **महत्ताबोधयुग्भक्तिदृढा भगवतः स हि ।**
**गुणस्तथाविधो ज्ञेयो गुणास्त्वन्ये तदन्तराः ।।**

भगवन्माहात्म्ययुक्त्या भक्त्या परिपूर्णो भक्तः नापूर्णकामत्वमनुभवति कदापि, माहात्म्यज्ञानयुक्तभक्तेः सम्पूर्णत्वात्, कथं तर्हि धर्मादिनामन्येषां साधनानां वर्णनं निरूपणादिकञ्च शास्त्रे प्रतिपादितमिति प्रश्ने -पराऽपरेति भेदेन सा द्विविधा, परा साध्यस्वरूपा, अपरा साधनस्वरूपा । बहुलो हि

१ श्रीहरिवाक्यसुधासिन्धुः त. २०३ श्लो. १०

मानवसमाजोऽपरभक्तिमान्, एतस्य धर्मे ज्ञानेऽरागे मान्द्यमे वा विपरीत वृत्तिसांकर्यमपि वर्तते , माहात्म्यज्ञानस्य गन्धोऽपि न स्यात् , अत एव एतस्यां सामान्यायां भक्तौ त्रयमन्यदन्तर्गतं न स्यात् तस्माच्चतुष्टयसमन्विता भक्तिर्यत्र भवेत् स खल्वैकान्तिकभक्तः कथ्यते । पराऽसाधारणीभक्तिस्तु केषां केषाञ्चित् भगवति, अतिशयमाहात्म्यज्ञानसहिता सा, एतस्यां भक्तावेवावशिष्टं त्रयमन्तर्गतं स्यात्, अयंभावः - यस्य दृढाऽविचाल्याऽमन्दायावत्सर्वस्वभगवदात्मिका तदात्मकवर्तना भवेत् तस्य भक्तस्य धर्मादित्रयदाढ्र्यादेव धर्मादिसाधनोद्योगः पराभक्तितः पृथग्भूतो नास्तीति । परमस्नेहापन्नभक्तस्य मनसि - चेदहं भगवत्कृतमर्यादामुल्लंघ्य वर्तिष्ये तदा तस्य स्नेहो मामुपरि न स्थास्यति इति विचारेण धर्मनिष्ठासिद्धिः, मम प्रियतमो कीदृशः श्रुतिस्मृतिपुराणेतिहासादयः मम प्रियतमं कथंत्वेन वर्णयति इति जिज्ञासातः ज्ञाननिष्ठासिद्धिः । परमस्नेहाच्च भगवदतिरिक्तपदार्थेष्वनवधानमेव तु वैराग्यमित्येवं वैराग्यनिष्ठासिद्धिः । उक्तं चापि भगवता -

[1] कृष्ण एवानुरागः स्यात् पुंसो गाढतरो हृदि ।
स्नेहः सः उदितः प्राज्ञैः पर्यायः प्रेम यस्य च ॥

यतोऽखण्डं हृदि भवेत् तस्यैव स्मरणं सदा ।
संकल्पोऽप्यन्यविषयो नोदियाच्च कदाचन ॥

स्नेहस्य परिपूर्णस्य लक्षणं ह्येतदेव हि ।
यत्र क्वचाऽन्यसंकल्पो न्यूनता तत्र तावती ॥

पूर्णस्नेहवतां क्वापि नान्यसंकल्पसंभवः ।
देशकालादि वैषम्ये स चेत्स्यात्तद्व्यथा भवेत् ॥

तथा च -

[2] कृष्णस्तद्भक्तभिन्नार्थे स्नेहः पापं महन्मतम् ।
येनार्षभोऽपि राजर्षिर्मृगत्वमगमद् द्रुतम् ॥

---

१ श्रीहरिवाक्यसुधासिन्धुः त. ४४ श्लो. ७ - १०
२ श्रीहरिवाक्यसुधासिन्धुः त. २४० श्लो. ८

तथापि भक्तिधर्मात्मजेन भक्तिनन्दनेन भक्तिसम्पोषकेन वा भगवता स्वामिनारायणेन दुर्गपत्तनीयमध्यमप्रकरणस्य ३२तमे तरंगे - धर्मादिसहाय्येन भक्तौ विघ्नं न भवेत्, धर्माद्यसहाये विषमदेशकालाद्यैर्भक्तौ विघ्नं भवेत् , अतो धर्माद्यंगसहिता भक्तिः कर्तव्या। अन्त्यप्रकरणस्य २१तमे तरंगे- भगवद्भक्तस्यात्मनिष्ठावैराग्यदाढर्यं चापेक्ष्यते, अन्यथा भगवतीव पदार्थान्तरे प्रीत्यापत्या वृत्तिविर्शीणत्वे विपरीते द्वेषादिभिर्बुद्धिभ्रष्टत्वे सति नास्तिकतोपासानभक्तिनाशच्च स्यात्" । एवं प्रकारेणैनेकेषु स्थलेषु धर्माद्यंगादिसहिता एव भक्ति कार्या इत्यपि प्रतिपादितवान् स्वयमेव। भक्तिनिष्ठावतः कानि लक्षणानि ? कीदृग्वर्तनं च भवेत्तस्य येन भक्तिनिष्ठावानयमिति ज्ञायते ?

[1] कृष्णस्वरूप एवैका प्रीतिदृढतरास्य हि ।
ततोऽन्यत्र स्ववृत्तिं तु धातुं नैव क्षमेत सः ।।

प्रेम्णैव कारयेत्कृष्णं, वासोलंकारधारणम् ।
कृष्णमानुषचरितश्रावणेऽस्य रुचिर्भृशम् ।।

भवेत्तथैव शास्त्रेऽपि कृष्णमूर्तिनिरूपणे ।
प्रीतीर्भक्तेषु तस्य स्यात् तेषां कृष्णानुरागिताम् ।।

द्रष्ट्वैव ह्यन्यथा त्वात्मपुत्रादावपि न क्वचित् ।
कृष्णसम्बन्धिनीष्वेव क्रियास्वस्य च नित्यदा ।।

न च वाच्यमत्र- "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत" इत्यादिकेषु तु धर्मस्यैव श्रेष्ठत्वं दृश्यते तर्हि कथमत्र भक्तेः श्रेष्ठता ? भागवतधर्मस्य संरक्षणाय संवर्धनायैव भगवतोऽवतरणं भवति । भागवतधर्मस्य भक्तेः चैक्यं प्रतिपादितं २४४तमे तरंगे - यथा धर्मः

[2]सोऽपि द्वेधा प्रवृत्तश्च निवृत्त इति वर्तते ।
उभयः कृष्णः संबंधात् भागवद्धर्म उच्यत इति।।
स एव भक्तिरित्युक्तो भगवद्भक्तितुष्टिकृत् "।

---

१ श्रीहरिवाक्यसुधासिन्धुः त. ४७ श्लो. २५ - २९
२ श्रीहरिवाक्यसुधासिन्धुः त. २४४ श्लो. १०, ११

अत एव-

**तरंति मायां जीवास्तु भक्त्या कृष्णस्य नान्यथा ।**
**देहांते ते प्राप्नुवन्ति ब्रह्मधाम तयैव ते ॥**

इत्येवं प्रकारेण प्रपत्तिपूर्वकमाहात्म्यज्ञानयुक्तधर्मादिसहिताभक्तिरेव हि मोक्षसाधनसामग्र्यां गरीयसी ॥

## मुक्तेः स्वरुपम्

धर्मज्ञानवैराग्यभक्तिभिः प्लावितचित्तवतां सत्पुरुषाणां समागमेन भवत्यनावृतं मोक्षद्वारमित्यौद्धवीयानां मतम् । असकृदुपदेशद्वारा त्रिगुणातीतत्वमवस्थात्रयातीतत्वं देहत्रयातीतत्वं च सम्पाद्य ब्रह्मस्वरूपमात्मानं विभाव्य भक्तिः - भगवच्चरणपरिचर्यैव मुक्तिः। यथोक्तं भगवता स्वामिनारायणेन -

**[1]निजात्मानं ब्रह्मरूपं देहत्रयविलक्षणम् ।**
**विभाव्य तेन कर्तव्या भक्तिः कृष्णस्य सर्वदा ॥**

भारतीयदर्शनेषु सर्वसामान्यतया गुणातीतत्वमादायात्मस्वरूपेरमणमेव मुक्तिरित्युच्यते । परंतु भगवता श्रीस्वामिनारायणेन ब्रह्मात्मकत्वेन परब्रह्मण उपासनं भक्तिरेव परमपुरुषार्थरिति प्रावर्तितम्, अर्थात् मुक्तदशायामपि "स्वामिसेवकसंबंधस्तु स्थास्यत्येव, मुक्तशब्दस्य मायिकोपाधिराहित्यपरत्वात्, न तु स्वतन्त्रवाचकत्वात्, तथा हि.-

**[2]एवं ज्ञात्वा तु ये कृष्णं, ब्रह्मीभूतात्मना सदा ।**
**प्रीत्या भजन्ति ते तूक्ताः प्राप्ता एव महद्गतिम् ॥**
**निर्विघ्नमेते यान्त्येव धाममुख्यं रमापतेः ।**

---

१ शिक्षापत्री - १२१

२ श्रीहरिवाक्यसुधासिन्धुः त. १२६ श्लो. ३६, ३७

[१] अणुवद्यत्र दृश्यन्ते, साष्टावृत्यंडकोटयः ।
यच्चोक्तं भगवद्धाम ब्रह्म चामृतमक्षरम् ॥

तेनैक्यं प्रापितेनैव, स्वात्मना राधिकापतेः ।
अतिशुद्धेन सेवायां येन वर्तेत नित्यदा ॥

एतच्छरीरावसाने प्रेत्यस्माल्लोकात् भगवत्सामीप्यं प्राप्य नन्दति मुक्तः तत्तु सर्वविदितमेव परंतु सुधासिन्ध्वनुसारेण तु एतच्छरीरावसानात्प्रागे-वैकान्तिकान्तिकानां मुक्तिस्सिद्धा । अस्मिन्नेव देहे परमस्नेहेनैक्यमापन्नो भक्तः मुक्तवदेवस्वात्मानमनुभवति यथा प्रोक्तं -

[२] अत ईदृक्सतां संगाद्येषां साक्षाद्धराविह ।
प्रीतिः सर्वाधिकाः स्यात्ते ज्ञानी मुक्ता इतीयताम् ॥

परं पदं यद्देहान्ते प्राप्यं तत्त इहैव हि ।
देहे सत्येव संप्राप्ताः कृतार्थाश्च ततो मताः ॥

तथा च -

सालोक्यसार्ष्टिसामीप्यसारूप्येकत्वमप्युत ।

मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम् ।

इत्यादिभिः श्लौकैः या मुक्तिर्वर्णिता सा त्वविरुद्धा एव परंतु तस्यामपि किञ्चिद् विशुद्धयन्नाह भगवान्-

तादात्म्यैनैव यन्नित्यं वर्तनं पुरुषस्य सः ।
प्रवेश इति विज्ञेयो न त्वंबुन इवांबुधौ ॥

---

१ श्रीहरिवाक्यसुधासिन्धुः त. १२० श्लो. २२, २३
२ श्रीहरिवाक्यसुधासिन्धुः त. २२५ श्लो. ३१, ३२

अनेन स्वामिसेवकभावमपहाय जीवब्रह्मैक्यापादनपराणां मतखण्डनं कृतम्, [१]"नित्यो नित्यानां चेतनश्चेतनानाम्, एको बहूनां यो विदधाति कामान्" [२] "ज्ञाज्ञौ द्वावजावीशनीशौ" [३]"भोक्ता भोग्यं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" [४] "समाने वृक्षे निमग्न अनीशया शोचति मुह्यमानः" [५]"यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।।" [६]" न त्वेवाहं जातु नाशं न त्वं नेमे जनाधिपाः। न चैव न भविष्यामो सर्वे वयमतः परम्" ।। [७]"सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इत्यादिकाः श्रुतिस्मृतयः [८] "नेतरोऽनुपपत्तेः" [९] "भेदव्यपदेशाच्च" [१०]"अनुपपत्तेस्तु न शारीरः" [११]"कर्मकर्तृ व्यपदेशाच्च" [१२]"संभोगप्राप्तिरितिचेन्न" [१३] "मुक्तोपसृप्य व्यपदेशाच्च" [१४] "सुषुप्त्युत्क्रान्त्योर्भेदेन" [१५] "अधिकं तु मोदनिर्देशात्" इत्यादीनि सूत्राणि च जीवब्रह्मणोर्शाश्वतिको नित्यभेदश्च प्रतिपादयन्ति अत एव नाद्रियामहे ।

मुक्तौ - जीवाक्षरपरब्रह्मात्मकसमस्ततत्त्वानां भिन्नत्वम्, अक्षरपर्यन्तानां सर्वेषां परब्रह्मणः सेवकत्वम्, सेवकेषु अक्षरस्य श्रेष्ठत्वम्, केवलं तेजो विहाय दिव्योपभोगानामपि सत्यत्वं, मुक्तपुरुषाणां भगवद्सदृशाकारत्वम्, भगवद्धामप्राप्त्यनन्तरापुनरावर्तित्वम्, सर्वतोऽधिकसौख्यत्वम् नित्यत्वम्, सर्वेषामानन्दमयत्वादिकं तु पूर्वमेव तत् तत् स्थानेषूक्तत्वात् नात्र द्विरावृत्तिः क्रियते !

---

१ कठोपनिषत्-२/१३
२ श्वेताश्तरोपनिषत्-१/९
३ श्वेताश्तरोपनिषत्-१/१२
४ मुण्डकोपनिषत्-३/१/२
५ भगवद्गीता-१५/१८
६ भगवद्गीता-२/१२
७ तैत्तिरीयोपनिषत्-२/१/१
८ शारीरक मीमांसा-१/१/१७
९ शारीरक मीमांसा-१/१/१८
१० शारीरक मीमांसा-१/२/३
११ शारीरक मीमांसा-१/२/४
१२ शारीरक मीमांसा-१/२/८
१३ शारीरक मीमांसा-१/३/२
१४ शारीरक मीमांसा-१/३/४३
१५ शारीरक मीमांसा-२/१/२२

## सुधासिन्धोः वैशिष्ट्यम्

श्रीपरब्रह्मपुरुषोत्तमाक्षरातीतपरमात्मश्रीस्वामिनारायणभगवद्वदनारविंदसमुद्भूतप्रबन्धोऽयं स्वेतरसमस्तविलक्षणः, अमानुषीमतिजसच्छस्त्राणां वर्ण्यविषये तु समेषां विश्वासः । परंतु तेषां रचना कुत्र कदा कथं वा सञ्जाता तस्य विषये विदुषां वैमत्यमास्ते । तस्मादेव हेतोः सच्छास्त्रेषु स्वमतपोषणपटुतराः धूर्ताः क्षेपणकार्यं कुर्वन्ति । परंतु सुधासिन्धोः रचना नैतादृशी, ग्रन्थेऽस्मिन् सर्वेषु तरंगेषु संवत्सरमासतिथिस्थानवस्त्राभूषणादिनां समुल्लेखः कृतः शतानन्दमुनिना। तथाहि -

[1] शकाब्दे विक्रमार्कस्य रसाश्ववसुभूमिते ।
द्वादश्यां तपसः कृष्णे वचोऽमृतमिदं हरेः ॥

तत्र दुर्गपुरे दुर्ग उत्तमक्ष्मेशितुर्गृहे ।
वेद्यां परिस्तृते मंचे स उपाविशदीश्वर : ॥

श्वेतं धोत्रं परिदधत् कौसुभं च शिरः पटम् ।
सस्वर्णतंतु कौसुंभमुत्तरीयपटं दधत् ॥

नानादेशागत स्वीयभक्तसंघपरिश्रितः ।
पद्यं श्रृण्वन् गीयमानं सवाद्यं साधुभिः प्रभोः ॥

प्रीतो भूत्वा गायनान्ते स त ऊचे स्वयं प्रभुः ।

वर्णनेनानेन ग्रन्थस्य रचनाकालविषये, उद्गातुः कालविषये वा न कदापि संशयादिनामवकाशो भवितुमर्हति । आधुनिकलेखकानां कृते प्रबन्धोऽयं प्रेरणाप्रदः, सुधासिन्धोः रचना भगवदभिमतवचोमृतानुसारिणी, अत एव साक्षान्नारायणपरिष्कृता तस्माद्धेतोः भ्रम —प्रमाद - विप्रलिप्सा - करणापाटवादिसमस्तदोषविरहिणी। ब्रह्मरसायनभाष्यकारस्तु सर्वेषां तरंगाणां "उपनिषत्" शब्देनाभिधानं कृतवान् । तत्र सन्ति हि कारणानि -

---

१ तरंग - ५६

सर्वतन्त्रस्वतन्त्रपरब्रह्ममुखोद्भूतत्वात्, वेदप्रतिपादितसमस्तसाधन संकलनसमुपबृंहितत्वात्, शाश्वतिकतृप्तिनिभतृप्तिप्रदानकरत्वात् , परब्रह्मव्यष्टिसमष्टिस्वरूपप्रतिपादनपूर्वकपरमसाध्याऽपेक्षिताऽसाधारणविविधोपासनापरिपूर्णत्वात् यथार्थात्मस्वरूप-मायास्वरूप-परब्रह्मस्वरूप-भगवत्प्राप्त्युपायभूतसाधनस्वरूप,मुक्तिस्वरूपादिनां विवेचकत्वात्, केवलाध्यात्मविषयकत्वाच्च। तासां नामानि यथा - वृत्तिधारणोपनिषत्, स्नेहस्वरूपोपनिषत्, प्रीतिपुरुषबलोपनिषत्, शरीरशरीरिभावोपनिषत्, व्योमसुषुम्णाशक्त्युपनिषत्, भगवत्सगुणसाका-रतोपनिषत्, मुमुक्षुसद्गुणाऽऽगमोपनिषत्, भगवन्मर्यादोपनिषत्, जीवमानसमृधोपनिषत्, भक्तकल्याणोपनिषत्, उपासनासिद्धिप्राप्त्युपनिषत्, सदसद्देशाऽऽभबुद्ध्युपनिषत्, मोक्षद्वारोद्घाटनोपनिषत् .......... इत्यादि।

एवंप्रकारेण सर्वेषां - द्विशताधिकद्विषष्टितरंगाणां नामानि सन्ति,नास्त्यस्मिन् द्विरावृत्तिः, यत्र कुत्रापि दृश्यते तत्र "द्विबद्धसुबद्धन्यायेन" परिज्ञातव्या एतादृक्नैकविधवैशिष्ट्यविशिष्टसुधासिन्धोः सिंहावलोकनम् तृतीयाध्याये करिष्ये भाष्यकारकृतश्लोकमाध्यमेन।

## ।। इति प्रथमोऽध्यायः।।